संस्कृत-लतिका

डॉ० वेदव्रत
एम० ए० पी-एच० डी०

संस्कृत-लतिका

(सैकण्डरी स्कूल परीक्षा १९७१ तथा हायर सैकण्डरी
परीक्षा १९७२ की कक्षा ९ व १० के लिए
वैकल्पिक संस्कृत के द्वितीय प्रश्न-पत्र के लिए गद्य-पुस्तक)

लेखक-सम्पादक
डॉ० वेदव्रत
एम. ए., पी-एच. डी.
अध्यक्ष, संस्कृत-विभाग
जवाहरलाल नेहरू डिग्री कॉलिज,
एटा, उत्तर प्रदेश।

प्रकाशक—
रोशन बुक डिपो
शिक्षात्मक प्रकाशक
नई सड़क दिल्ली।

प्रकाशक : रोशन बुक डिपो, नई सड़क दिल्ली ।

प्रथम संस्करण : १९६८

मूल्य १.७५

मुद्रक : विकास प्रेस को-आपरेटिव इन्डस्ट्रीयल सोसायटी लि०,
बी-५, प्रह्लाद मार्कीट, करोल बाग, नई दिल्ली-५ ।

प्रस्तुति

पाठ-सूची पर एक दृष्टि डालने से ही स्पष्ट हो जाएगा कि प्रस्तुत पुस्तक में कुछ पाठ संकलित हैं, कुछ अनूदित और कुछ स्वयं रचित। सभी पाठ गद्यात्मक हैं। कुल में से सोलह पाठ विविध गद्य-ग्रन्थों में से संकलित हैं। संकलन के स्रोत हैं--पञ्चतन्त्र, हितोपदेश, शिवराज-विजय, जातकमाला, कादम्बरी, भोज-प्रबन्ध, बेताल-पञ्चविंशति, कुछ आधुनिक पत्रिकाएं आदि। इन के अतिरिक्त तीन पाठों के स्रोत पद्यात्मक हैं—रामायण, महाभारत और कथासरित्सागर, जिनके पद्य को गद्यरूप देकर संकलित किया गया है। इस प्रकार का गद्य-रूपान्तर पहली वार प्रस्तुत किया जा रहा है।

चार पाठ अनूदित हैं, जिन में से प्रथम पाठ कवीन्द्र रवीन्द्र की प्रसिद्ध 'गीताञ्जलि' के 'वरदान' का संस्कृत-रूपान्तर है, दूसरा एक जापानी लोककथा का, तीसरा गौतम-बुद्ध के लोक-प्रसिद्ध जीवन-चरित का और चौथा एक भारतीय लोक कथा - 'बन्दर-बाँट' का।

शेष सात पाठ स्वरचित हैं। इनमें से एक पाठ संख्या सिखाने के लिए, दो पाठ 'पत्र' और 'प्रस्ताव' सिखाने के लिए, तीन पाठ तीन उपयोगी निबन्धों को निबद्ध करने के लिए तथा अन्तिम पाठ विद्यार्थियों की योग्यता के परीक्षणार्थ बनाया गया है।

इन पाठों के द्वारा और इनके अभ्यासों द्वारा संस्कृत भाषा और साहित्य के निम्नलिखित अंगों का परिचय, ज्ञान एवं विद्यार्थियों द्वारा अपनी रचना एवं अनुवाद में प्रयोग कराया जा सकता है :—

१ संस्कृत के विविध गद्य-साहित्य का।

२ रामायण से लेकर आज तक की संस्कृत-भाषा के प्रभावशाली गद्य-रूप का।

३ पत्र एवं प्रस्ताव के लिए उपयुक्त एवं ऐसी ही व्यावहारिक भाषा एवं लेखन-प्रकार का।

४ संस्कृत के समृद्ध साहित्य की प्रसिद्ध एवं लोक-प्रचलित शताधिक सूक्तियों का।

५ विभिन्न प्रकार के अजन्त तथा हलन्त शब्दों के तीनों लिंगों में प्रयोज्य रूपों का, जिन में संज्ञा, सर्वनाम व दिशावाची शब्द भी सम्मिलित हैं।

६ अदुरूह समस्त शब्दों के अर्थ-सहित विग्रह-युक्त रूपों का एवं सन्धि-युक्त पदों के विच्छेद का।

७ संख्यावाची शब्दों का।

८ प्रमुख 'कृत्'--प्रत्ययों का; जैसे—भूतकालिक (क्त, क्तवतु), पूर्वकालिक (क्त्वा, ल्यप्), हेत्वर्थक (तुमुन्), तव्य एवं अनीयर् का।

९ तरप्, तमप् से बनने वाले शब्दों का।

१० वाक्य-रचना में कर्तृ-वाच्य, कर्म-वाच्य एवं भाव-वाच्य का।

११ सभी कारकों का एवं कतिपय विशिष्ट उपपद विभक्तियों का।

विद्यार्थीगण गद्य-पुष्पों की इस लतिका से लाभान्वित हों, इसी में सम्पादक के श्रम की सार्थकता है।

सम्पादक—लेखक

लतिका-पुष्पाणि

संख्या	पाठः		पृष्ठे
१.	वरं याचे	[अनूदितं गीताञ्जलि-गीतम्]	१
२.	मित्र-सम्प्राप्तिः	[पञ्चतन्त्रे]	३
३.	घण्टाकर्णो वशीकृतः	[हितोपदेशे]	६
४.	धिक् क्षात्रं बलम्	[वाल्मीकि-रामायणस्य गद्यरूपम्]	८
५.	प्रजापालो भूपालः	[अनूदिता जापानीया लोककथा]	१४
६.	राजकुमारः सिद्धार्थः	[गौतम-बुद्धस्य जीवनात्]	१६
७.	दुर्ग-दौवारिकः	[शिवराज-विजये]	२४
८.	राज-प्रबन्धः	[संख्या-प्रयोगः]	२८
९.	मूर्खैः कृतम् चातुर्यम्	[कथा-सरित्-सागरात्]	३३
१०.	कलहे न कस्यापि लाभः	[लोक-कथाऽनुवादः]	३८
११.	बोधिसत्त्वस्य मत्स्य-जन्म	[जातक-मालायाम्]	४३
१२.	वैशम्पायन-शुकस्य आत्म-ग्लानिः	[कादम्बर्याम्]	४६
१३.	रङ्गभूमौ कर्ण-प्रवेशः	[महाभारतस्य गद्यरूपम्]	५०
१४.	पत्र-लेखनम्	[सम्पादकस्य]	५४
१५.	यद्भविष्यो विनश्यति	[पञ्चतन्त्रे]	५८
१६.	महाचतुरः शृगालः	[पञ्चतन्त्रे]	६२
१७.	भारतीयम् गौरवम्	[निबन्धनम्]	६७
१८.	शठे शठो जीर्णधनो बभूव	[पञ्चतन्त्रे]	७१
१९.	अज्ञात-पुत्रस्य नामकरणम्	[मञ्जूषा-पत्रिकायाम्]	७५

२०. गणतन्त्र-दिवसः	[निबन्धनम्]	८२
२१. भोजस्य प्रज्ञा मुञ्जस्य तापः	[भोज-प्रबन्धे]	८५
२२. कुम्भ-जातकम्	[जातक-मालायाम्] [मद्य-प्रत्याख्यानस्य नवः प्रकारः]	८६
२३. पर्वत-यात्रा	[निबन्धनम्]	९३
२४. वानरस्य प्रतिशोधः	[पञ्चतन्त्रे]	९७
२५. समुद्र-टिट्टिभयोः कलहः	[पञ्चतन्त्रे]	१०१
२६. निबन्ध-लेखनम्	[सम्पादकस्य]	१०५
२७. सूक्तयः	[सङ्कलितानि कवि-वाक्यानि]	१११
२८. विज्ञप्तयः	['दिव्यज्योति'-'संस्कृत-रत्नाकर'-पत्रिकयोः]	११७
२९. शूद्रक-वीरवरयोर् औदार्यम्	[बेताल-पञ्चविंशत्याम्]	११९
३०. योग्यता-परीक्षणम्		१२३

प्रथमः पाठः

वरं याचे

१ 'विपद्भ्यस् त्रायस्व माम्' इति याचमानो नाहं प्रभो !
द्वारं ते समायातः । 'विपद्भ्यो न बिभ्याम्' इत्येव वरं मे देहि ॥

२ दुःखैर्व्यथिताय चित्ताय समाश्वासनस्य भिक्षां न याचे ।
'दुःखान् विजयेय' इति आशिषं देहि । एषा एव अभ्यर्थना ॥

३ ते साहाय्यं न प्राप्नोमि चेत् वरम् एतत् तु देहि यत् ।
दैन्यम् अङ्गीकृत्वा अवशो न भवेयम् ॥

४ संसारस्य अनिष्टाः अनर्थाः छल-छद्मानि एव च मम पथि संतिष्ठन्ते ।
तथापि प्रतारणाभिर् आभिर् अक्षीणं खलु अन्तःकरणं मे ॥

५ 'त्रायस्व माम्' इति याचनाम् उच्चारयन् नाहं द्वारं ते उपातिष्ठम् ।
सङ्कट-सागरे तरण-शक्तिम् एव केवलां याचे ॥

६ 'भारं मे अपाकुरु' इति याचनायाः सम्पन्नता भवेद् इति आश्वासनं न वाञ्छामि । भारम् एनं वहन् प्रचलितुं शक्नुयाम् इति एवं प्रार्थये ॥

७ सुख-पूर्णेषु क्षणेषु नतमस्तकोऽहं दर्शनं ते कर्तुं पारयेय ।

८ किञ्च दुःख-दग्धासु रात्रिषु यदा विश्वं माम् उपहसेत् नाहं शङ्का-कुलः स्याम्—इत्येव वरम् वृणे ।

—कवीन्द्रः रवीन्द्र-ठाकुरः

शब्दकोशः

समाश्वासनम्=सान्त्वना, तसल्ली । प्रतारणा=वञ्चना, बहकावा ।

अभ्यासः

१ कोष्ठक में दिये शब्दों में से उचित शब्द के द्वारा रिक्त स्थान की पूर्त्ति करो :—

(क) कविः ठाकुरः ईश्वरं विपद्भ्यः······याचते ।
(त्राणम्, अभयत्वम्)

(ख) कविः दुखानि······इच्छति । (दूरीकर्तुम्, विजेतुम्)

(ग) कवेः दृष्ट्या······महत्तरम् । (अदैन्यं, ईश-साहाय्यम्)

(घ) संसारस्य कष्टैः कवेः हृदयं······न जातम् । (अक्षीणं क्षीणं)

(ङ) ······तरण-शक्ति याचते कविः । (सागरेषु, सङ्कटेषु)

(च) ईशानुकम्पया कविः भारम्··· समर्थो भविष्यति :
(वोढुम्, अपाकर्तुम्)

(छ) मानवः······ईशं विस्मरति । (दुःखेषु, सुखेषु)

(ज) प्रभु-भक्त्या जनः उपहासेषु अपि······भवति ।
(शङ्कारहितः, शङ्काकुलः)

२ कवि ने ईश्वर से क्या मांगा है और क्या नहीं ?

३ कवि की इस वर-याचना में कहे आठ वाक्यों से प्रतीत होता है कि उसे निम्नलिखित आठ गुण प्रिय हैं । बताओ किस वाक्य से कौन सा गुण अभिप्रेत होता है :—

	संकेत		संकेत
अदैन्य	(३)	निर्भयता	(१)
आत्मविश्वास	(४)	प्रगति करने की शक्ति	(६)
ईश-स्मरण	(७)	विजयाभिलाषा	(२)
निःशङ्कता	(८)	संघर्ष-प्रियता	(५)

संकेत में दी संख्या कविता के अनुच्छेदों की है। अब इस आधार पर 'कवि ठाकुर द्वारा प्रार्थित गुण' विषय पर एक १५—२० पंक्ति का निबन्ध हिन्दी में लिखो। फिर 'ठाकुर-प्रार्थिताः गुणाः' विषय पर उसकी संस्कृत बनाओ।

४ निम्नलिखित क्रियाओं में लकार, पुरुष और वचन का ध्यान रखकर अर्थ बताओ :—
त्रायस्व, बिभ्याम्, देहि, याचे, प्राप्नोमि, भवेयम्, उपातिष्ठम्, अपाकुरु, प्रार्थये, पारयेय, उपहसेत्, स्याम्, वृणे।

द्वितीयः पाठः

मित्र-सम्प्राप्तिः

अस्ति दाक्षिणात्ये जनपदे एकः न्यग्रोधो नाम महान् वृक्षः। तत्र लघुपतनको नाम वायसः प्रतिवसति। एकः लुब्धकः तत्र वृक्ष-तले जालं प्रासारयत्। चित्रग्रीवो नाम कपोतराजः सपरिवारः तत्र तण्डुलानां भक्षणाय आपतत्। सपरिवारः च तत्र निबद्धः। ते सर्वे जालेन सह उड्डीनाः आकाशे। चित्रग्रीवः च एकस्य हिरण्यकस्य मूषकस्य मित्रस्य बिलम् अगच्छत्। हिरण्यकः सर्वेषां पाशच्छेदम् अकरोत्।

लघुपतनकः काकः चित्रग्रीवस्य बन्धं मोक्षञ्च सर्वम् अपश्यत्। सः व्यचारयत्, एनं मूषकं मित्रं करोमि इति।

ततः प्रभृति द्वावपि मित्रभावम् अगच्छताम् । लघुपतनकः मांस-खण्डानि बलि-शेषानि वात्सल्येन हिरण्यकायानयति । हिरण्यकोऽपि तण्डुलान् भक्ष्य-विशेषान् च लघुपतनकायार्पयति । एवं स मूषकः तस्योपकारेण प्रसन्नः तस्यात्यन्तं विश्वसिति । तस्य पक्षयोः तिष्ठति । तेन सह सर्वदैव गोष्ठीं करोति ।

एकदा लघुपतनकोऽकथयत्—"अस्ति दक्षिणापथे महासरः । तत्र मम परमः सुहृत् कूर्मः मन्थरको नाम । तेन सह सुखेन कालं नेष्यामः । अत्र तु दुर्भिक्षेण सीदामः । मूषकोऽपि तस्य पृष्ठमारोहत् तेन सह चागच्छत् दुर्भिक्षक्लेशं च अतरत् ।

अथ लघुपतनक-मन्थरकौ अपि स्नेहेन अमिलताम् । हिरण्यकः अपि मन्थरकस्य प्रणामम् अकरोत् । परिचयानन्तरं ते सर्वे सुखम् अवसन् ।

अथैकदा चित्राङ्गो नाम हरिणः लुब्धकाद् भीतः तस्मिन् एव वने प्राविशत् । हिरण्यकः भयात् शरेषु प्राविशत् । लघुपतनकः वृक्षम् आरोहत् । मन्थरकः सरसि प्राविशत् ।

लुब्धकाः अगच्छन् इति यदा लघुपतनकः वृक्षात् अबोधयत् तदा सर्वे बहिर्-आगच्छन् । मित्र-भूताः सुखेन कालम् अनयन् ।

एकदा गोष्ठी-समये चित्राङ्गो नागच्छत् । लघुपतनकः वनं शोधयति । पश्यति च दृढेन पाशेन नियन्त्रितं चित्राङ्गम् । सः शीघ्रम् आगच्छत् हिरण्यकञ्च पृष्ठमारोप्य चित्राङ्गसमीपे अनयत् । मन्थरकः अपि स्नेहात् शनैः शनैः तं प्रदेशम् आगच्छत् । मूषकः पाशम् अखण्डयत् चित्राङ्गः च अधावत् । लघुपतनकः वृक्षम् आरोहत् । हिरण्यकः बिलं प्राविशत् । मन्थरकः स्थले यावत् गच्छति तावत् लुब्धकः तम् अपहरति, ग्रन्थि-मध्ये च स्थापयति ।

त्रयो अपि वयस्याः दुःखिताः अभवन् ।
वायसः एकम् उपायम् अकथयत् ।

"अयं चित्राङ्गः पल्वलस्य तीरे निश्चेतनः तिष्ठतु। अहं अस्य शिरः उल्लेखयामि। लुब्धकः मृगं मृतम् अवगमिष्यति। मन्थरकं भूमौ क्षेप्स्यति, मृगार्थं च धाविष्यति। तावत् हिरण्यकः मन्थरकस्य पाशान् खण्डयिष्यति। मन्थरकः च शीघ्रं पल्वलं प्रवेक्ष्यति। एवम् सर्वे आचरन्, मन्थरकः च ग्रन्थि-मध्यात् निरगच्छत्। पल्वलं च प्राविशत्।

व्याधे दूरं गते सर्वे पल्वलम् अगच्छन्। महासुखेन च कालं नयन्ति। एवं बुधेन मित्र-संग्रहः कार्यः। यतः :—

असाधनाः अपि प्राज्ञाः बुद्धिमन्तः बहुश्रुताः।
साधयन्ति च कार्याणि काकाखु-मृग-कूर्मवत्॥

शब्दकोशः

न्यग्रोधः	=वड़ का वृक्ष,	लुब्धकः	=शिकारी,
पाशः	=फन्दा	गोष्ठीम्	=गप्प शप, बैठक
शोधयति	=खोज करता है	निश्चेतनः	=विना हिले डुले
उल्लेखयामि	=कुरेदता हूं	आखुः	=चूहा
ग्रन्थिः	=पोटली।		

अभ्यासः

१. इस पाठ में आये इन पदों में सन्धि करो :—
भक्षणाय+आपतत्; वि+अचारयत्; प्र+असारयत्; मृग+अर्थम्; हिरण्यकाय+आनयति; लघुपतनकाय+अर्पयति; तस्य+उपकारेण; तस्य+अत्यन्तम्; च+अतरत्; परिचय+अनन्तरम्।

२. इस पाठ का शीर्षक इस कथा के उद्देश्य से मेल खाता है या नहीं? दोनों में ताल-मेल विठाओ। साथ ही शिक्षा-रूप में दिये श्लोक का अर्थ लिखो।

३. नीचे लिखे प्रश्नों के संस्कृत में उत्तर दो :—

(क) लुब्धकः किम् अकरोत् ?

(ख) वायसः किम् अपश्यत् किं च अचिन्तयत् ?

(ग) किंनामा हरिणः केन भीतः कुत्र प्राविशत् ?

(घ) लुब्धकेन को गृहीतः कुत्र च स्थापितः ?

४. नीचे लिखे शब्दों का अर्थ लिखकर वाक्य बनाओ :—
काकः, आखुः, कूर्मः, पाशच्छेदम्, उल्लेखयति ।

तृतीयः पाठः

घण्टाकर्णो वशीकृतः

आस्ते श्री-पर्वत-मध्ये ब्रह्मपुर-नाम नगरम् । तत्र शैलशिखरे घण्टाकर्णो नाम राक्षसः प्रेतः वा प्रतिवसति इति जनप्रवादः प्रासरत् । एकदा नागरिकाः वनमध्ये कंचित् नरं मृतं खादितं च अपश्यन् । तदा-प्रभृतिः प्रतिदिनं वनस्य मध्ये घण्टा-रवः अश्रूयत । अथ घण्टाकर्णः राक्षसः भूतो वा प्रेतो वा मनुष्यान् खादति, घण्टां च वादयति इति विश्वासेन पौराः नगरम् अत्यजन् ।

राजा चिन्ताकुलः अतिष्ठत्, न च राक्षसस्य ग्रहणे कंचित् उपायम् अपश्यत् ।

अथ कराला नाम कुट्टिनी भूपतिम् अकथयत्, "यदि भवान् धनस्य व्ययाय तत्परः तदा अहम् एनं घण्टाकर्णं साधयामि।" भूपतिः सन्तोषम् अगच्छत्, पूर्वम् एव च तस्यै प्रभूतं धनम् अयच्छत्।

सा कुट्टिनी वनमध्ये गत्वा मण्डलम् रचयित्वा, गणेशादिकं देवगणम् अपूजयत्। वानर-प्रियाणि च तत्र फलानि बहुशः प्राक्षिपत्। ततः फलैर् आकृष्टः कश्चिद् वानरः घण्टां हस्ते धारयन् फलानि आहर्तुं तत्र आजगाम। कुट्टिनी जानाति स्म यत् पूर्वं कदाचित् कश्चित् चौरः तां घण्टां चोरयित्वा वने प्रणष्टः। पलायमानं तं चौरं कश्चित् व्याघ्रः व्यापादयत्। तस्य हस्तात् च पतितां घण्टां कश्चित् वानरः अध्यगच्छत्। तां घण्टां सः वानरः प्रतिक्षणं वादयति स्म। अतः प्रेतः राक्षसो वा अयं घण्टां वादयति इति पौराणां मिथ्याविश्वासः समभवत्।'

स वानरः उभाभ्याम् अपि हस्ताभ्यां फलानि संगृहीतुं प्रवृत्तः, घण्टां च एकतः प्राक्षिपत्। सा कुट्टिनी तु यदा वानरं फलेषु आसक्तम् ऐक्षत तदा शनैः शनैः तां घण्टां निःशब्दम् अपाहरत्। कुशलिनी च नगरं प्रत्यागता। सकलानां च लोकानां पूज्या अभवत्।

शब्दकोशः

शैलशिखरम्	=पर्वत की चोटी	मण्डलम्	=घेरा
जन-प्रवादः	=अफवाह	पलायमानम्	=भागते हुए को
प्रभृति	=से लेकर	व्यापादयत्	=(वि+अपादयत्)
कुट्टिनी	=चालाक स्त्री		=मार दिया।

अभ्यासः

१ निम्न-लिखित प्रश्नों के उत्तर संस्कृत में दो :—

(क) नगरे कीदृशः जन-प्रवादः प्रासरत्?

(ख) राक्षसं वशीकर्तुं का समायाता?

(ग) सा च नृपतिं किम् अकथयत् ?

(घ) सा तु वने घण्टां कदा अपाहरत् ?

२ कुट्टिनी ने वन में जाकर क्या क्या किया ? लिखो ?

३ इस कथा से क्या शिक्षा मिलती है ? लिखो ।

४ पाठ में आए इन-क्रिया शब्दों के पुरुष, वचन और लकार का ध्यान रखते हुए अर्थ लिखो :—
प्रासरत्, अपश्यन्, अश्रूयत, अत्यजन्, साधयामि, प्राक्षिपत्, आजगाम, प्रणष्टः, व्यापादयत्, वादयति स्म, प्रत्यागता ।

चतुर्थं पाठः

धिक् क्षात्रं बलम्

महाराजस्य गाधेः पुत्रः महाराजः विश्वामित्रः पृथिवी पालयति स्म । सः बहूनि सहस्राणि वर्षाणि राज्यम् अकरोत् । कदाचित् सः महाराजः सेनया सहितः नगराणि, राष्ट्राणि, वनानि च परिभ्रमति स्म । क्रमशो विचरन् महाराजः नानावृक्षैः समाकुलं, नानामृग-गणैः आकीर्णं, ब्रह्मर्षिगणैः सेवितम् महर्षेः वसिष्ठस्य आश्रम-पदम् आगच्छत् । महाराजः विश्वामित्रः तं ब्रह्मर्षि-वसिष्ठं प्राणमत् ।

ब्रह्मर्षिः वसिष्ठः स्वागतं ते इति अकथयत् । आसनं च समर्पयत् । ततः उपविष्टाय तस्मै महाराजाय विश्वामित्राय महर्षिः फलानि मूलानि च उपाहरत् । महाराजोऽपि प्रसन्नः तस्य पूजाम् अलभत ।

ततः महाराजः तेषां तपसि अग्निहोत्रे शिष्येषु च कुशलम् अपृच्छत। वसिष्ठोऽपि सर्वेषु तेषु कुशलम् अवदत्।

वसिष्ठः—"राजन्! कच्चित् ते कुशलम्? कच्चित् ताः प्रजाः रञ्जयन् धर्मेण पालयसे? कच्चित् ते भृत्याः शासने तिष्ठन्ति? कच्चित् ते बलेषु, कोषेषु मित्रेषु कुशलम्?"

विश्वामित्रः—"(सविनयम्) "ब्रह्मर्षे! सर्वत्र कुशलम्।"

एवं सुचिरं कालं तौ शुभाः कथाः परस्परम् प्रीत्या अकथयताम्। अथ वसिष्ठः प्रहसन् अकथयत्—"महाबल! अस्य बलस्य तव च आतिथ्यं कर्तुमिच्छामि। भवान् अति श्रेष्ठः पूजनीयः अतिथिः, भवान् मे सत्क्रियां स्वीकरोतु।"

महामतिः विश्वामित्रः अकथयत्—"भगवन्! पूजावाक्येन, फलेन मूलेन, आचमनीयेन, भगवद्दर्शनेन च मे आतिथ्यं कृतम्। महाप्राज्ञ! पूज्येन सर्वथा सुपूजितो अहम्।"

धर्मात्मा वसिष्ठः पुनः पुनः तं राजानं सत्काराय अबाधत। विश्वामित्रोऽपि तम् अकथयत्—"मुनिसत्तम! यथा भगवतः प्रियम् तथा अस्तु।"

वसिष्ठोऽपि प्रसन्नः स्वां तां शबलां कामधेनुम् अकथयत्—"शबले! सबलस्य राजर्षेः अस्य सत्कारं करिष्यामि। क्षिप्रम् आयाहि। महार्हेण भोजनेन सत्कारं कुरु! रसेन अन्नेन पानेन लेह्येन चोष्येण संयुतम् अन्नानां निचयम् अस्मै सृज।"

सा शबला यथेप्सितम् तान् कामान् अरचयत्। उच्चावाचान् भक्ष्यान्, महार्हाणि पानानि, आढ्यस्य ओदनस्य पर्वतोपमान् राशीन्, दधि-कुल्याः, स्वादु रसानां षड्रसानां सुपूर्णानि भाजनानि सहस्रशः अरचयत्। विश्वामित्रस्य सर्वं तद् बलं सु-सन्तुष्टम् अभवत्।

विश्वामित्रोऽपि सान्तःपुरः सब्राह्मण-पुरोहितः मंत्रिसहितः सभृत्यः पूजितः परमेण हर्षेण वसिष्ठम् उवाच—"ब्रह्मन् ! त्वया अहं पूजितः। सुसत्कृतः। भगवन् ! शबला हि रत्नम्। रत्नहारी च नृपः। मे गवां शत-सहस्रेण शबलां देहि ! द्विजवर ! धर्मतः एषा मम।"

वसिष्ठः अकथयत्—"राजन् ! गवां शतसहस्रेण कोटिशतैर्वा रजतस्य राशिभिर्वा शबलां न दास्यामि। एषा गौः माता मम। अस्यां हव्यं, कव्यं, अग्निहोत्रं, बलिः, होमः, विविधाः विद्याः, तथैव च प्राणयात्रा। अत्र सर्वम् अस्याः आयत्तम्। एतत् सर्वस्वम्। सत्येन सदा एषा मम तुष्टिकरी। राजन् ! अन्यैः बहुभिः कारणैः शबलां न दास्यामि।"

यदा वसिष्ठोऽपि कामधेनुं न अयच्छत् तदा विश्वामित्रः तां शबला गाम् आकर्षत्। सा शबला रुदन्ती क्रोशन्ती] च अनिलवेगेन तस्य वसिष्ठस्य महात्मनः पादमूलम् अगच्छत्। वसिष्ठः अवदत् 'राजन् ! त्वं बली क्षत्रियः पृथिव्याः च पतिः। इयम् अक्षौहिणी सेना गजैः वाजिभिः रथैश्च व्याप्ता वर्त्तते। त्वं बलवत्तरः इति चिन्तयसि परं न बलं क्षत्रियस्य। ब्राह्मणो बलवत्तरः। ब्रह्म-बलं क्षत्रियात् तु बलवत्तरम्।'

राजा विश्वामित्रः परमः क्रुद्धः विविधानि दिव्यानि अस्त्राणि अमुञ्चत्। तानि अस्त्राणि विमुक्तानि दृष्ट्वा सर्वे मुनयः शिष्याः च नानादिग्भ्यः विद्रवन्ति। महात्मनः वसिष्ठस्य आश्रमपदं शून्यम् अभवत्।

'आश्रमं चिर-संवृद्धं विनाशितवान् असि। दुराचरोऽसि। तत्मात् त्वं न भविष्यसि। क्व च ते क्षत्रियबलं, क्व च महत् ब्रह्मबलम्। पश्य मम दिव्यं ब्रह्म-बलम्।' इति उक्त्वा ब्रह्मदण्डम् अधरत्। वाग्यतो धर्मं परिपालयन् अतिष्ठत्।

विश्वामित्रः घोरम् आग्नेयं, वारुणम्, रौद्रं, ऐन्द्रं, ऐषीकम् अन्यानि च घोराणि अस्त्राणि प्राक्षिपत्।

तानि सर्वाणि अस्त्राणि वसिष्ठः ब्रह्मदण्डेन ग्रसते। न च स्व-धारणात: विचलति। तस्य महात्मनः वसिष्ठस्य तेभ्यो रोम-कूपेभ्यः मरीचय इव निरपतन्।

ततो मुनि-गणाः वसिष्ठम् अस्तुवन्—'ब्रह्मन्! ते बलम् अमेयम्। महाबलः विश्वामित्रः त्वया निगृहीतः।'

विश्वामित्रोऽपि विनिःश्वस्येदम् अकथयत्—
धिग्बलं क्षत्रिय-बलम्, ब्रह्मतेजो बलं बलम्।
एकेन ब्रह्मदण्डेन सर्वास्त्राणि हतानि मे॥ इति

शब्दकोश :

क्षात्र-बलम्	=शारीरिक क्षत्रिय बल	ब्राह्म बलम्	=ब्राह्मण का आचार या वेद का बल
बलेषु	=सेनाओं में	क्षिप्रम्	=शीघ्र
लेह्यम्	=चटनी	यथेप्सितम्	=मनचाहे
आढ्यस्य	=बढ़िया	चोष्येण	=चूसने योग्य पदार्थ
हव्यम्	=हवन की सामग्री	कव्यम्	=पितरों का भोजन
विद्रवन्ति	=दौड़ते हैं	वाग्यतः	=मौन, चुपचाप

अभ्यासः

१ वाक्य पूर्ति करो :—
महाराजः सेनया वनानि···—। वसिष्ठः···फलानि मूलानि च उपाहरत्
महाराजः अपि प्रसन्नः—अलभत। महाराजः —कुशलम् अपृच्छत्।
तौ शुभाः —प्रीत्या अकथयताम्। भवान् मे सत्क्रियां—।
सबलस्य राजर्षेः सत्कारं —। त्वम् अन्नानां निचयं—।

२ इन प्रश्नों का उत्तर संस्कृत में दो :—
शबला गौः कस्य अभवत्?
कः शबलाम् आहरत्?

ब्राह्म-बलं कस्मात् बलवत्तरम् ?
कः दिव्यानि अस्त्राणि अमुञ्चत् ?
कः सर्वाणि अस्त्राणि ब्रह्मदण्डेन ग्रसते ?
विश्वामित्रः विनिःश्वस्य किम् अकथयत् ?

३ हिन्दी में अनुवाद करो। साथ ही रेखांकित शब्दों में आई गुण-सन्धि का विच्छेद करो :—

अध्यापकः अकथयत्। "भोः शिष्य तवेदं कार्यम्। सर्वदेमं परिपालय। सर्वदोप सेवस्य गुरून् सर्वदोपाहर कनीयोभ्यः सर्वदोपचर दीनान्। सर्वदोपकुरु असहायेषु। अनेन ते भाग्योदयः भविष्यति। राजर्षिः विश्वामित्रः रामायोपादिशत्। पितुर् आज्ञायाः पालनेन ऋणं तव अपनेष्यते तवेह लोके यशो वर्धिष्यते। स्वर्गे चेदं ते सुखम् आवहतु। तवोपकारो ममोपदेशेन भवतु। अतोहम् उपादिशम्।

४ तीसरे प्रश्न के गद्य को पढ़कर निम्न प्रश्नों का उत्तर दो:—
गुरुः कान् उपादिशत् ?
ऋणं कथम् अपनीयते ?
कीदृशो व्यवहारः कनीयोभ्यः ?
रामस्य क उपदेशकः ?
शिष्यः कान् सेवेत ?

५ संस्कृत में लिखो:—
राम ! तेरी यह पुस्तक है। तेरी यह कापी है। तेरा यह कर्तव्य है। सर्वदा उपकार कर। सदा ईश्वर की उपासना कर। ईश्वर की उपासना से तेरा भाग्य-उदय होगा। तेरा इस लोक में यश होगा। स्वंग में यह तेरे सुख को लायेगा। इस से तेरा ऋण हटेगा (अप+या)।

६ इस पाठ में सर्व नामों के ये पद आये हैं। बताओ। उनका मूल सर्वनाम शब्द क्या है ? लिङ्ग और विभक्ति कौन सी हैं ?

मूल सर्वनाम शब्द		लिङ्ग	विभक्ति
सः ।	तत्	पुंल्लिङ्ग	प्रथमा एकवचनम्
तम् ।	...	...	...
ते ।	...	...	...
तस्मै ।	...	...	...
तस्य ।	...	...	...
तेषाम् ।	...	...	...
तेषु ।	...	...	...
ताः ।	...	...	...
तौ	...	...	...
अस्य	...	...	...
तव	...	...	...
अहम्	...	...	...
ताम्	...	...	...
अस्मै	...	...	...
तान्	...	...	...
तद्	...	...	...
त्वया	...	...	...
मे	...	...	...
मम	...	...	...
एतत्	...	...	...
सर्वम्	...	...	...
अस्याः	...	...	...
एषा	...	...	...
अन्यैः	...	...	...
सा	...	...	...
त्वम्	...	...	...
तानि	...	...	...
सर्वे	...	...	...
तेभ्यः	...	...	...
इदम्	...	...	...

७ ऊपर दिखाये सर्वनाम पदों के निम्नलिखित मूल शब्द ही विविध रूपों में आये हैं :—

तत् । इदम् । युष्मद् । अस्मद् । एतत् । सर्व । अन्य ।

जैसे विशेषणों के रूप विशेष्य के अनुसार होते हैं वैसे ही सर्वनामों के रूप अपने 'स्थानी' के समान होते हैं । (स्थानी' उस संज्ञा शब्द को कहते हैं जिसके स्थान पर सर्वनाम का प्रयोग होता है ।) इस प्रकार सर्वनाम-शब्दों के रूप भी तीनों लिङ्गों में होते हैं ।

इन सर्वनामों के रूप तुमने आठवीं कक्षा में भी पढ़े हैं, यहां फिर से तीनों लिंगों में उनके रूप लिखकर आवृत्ति कर लो ।

पञ्चमः पाठः

प्रजापालो भूपालः

एकदा जापानाभिधाने महाद्वीपे अजिनाभिधानो भूपः राज्यम् अकरोत् । तस्य मौर्य-शाक्योर्जाः त्रयः आत्मजाः आसन् । कनिष्ठेऽपत्ये अजिनस्य स्नेहः पक्षपातश्च ।

अथैकमिस्न् दिने सः सर्वान् पुत्रान् अपृच्छत्,–"अयि राजकुमाराः ! निजेषु आत्मजेषु कनिष्ठे ज्येष्ठे वा स्नेहं सम्पादयिष्यथ !"

मौर्योऽकथयत्—"तात ! ज्येष्ठ एव स्नेहस्य भाजनम् ।"

शाक्योऽवदत्—"न हि देव ! कनिष्ठ एव स्नेहस्य भाजनम् । ज्येष्ठे तु अन्येऽपि स्निह्यन्ति ।"

ऊर्जस्तु मौनमाकलयत्। आभ्याम् उत्तराभ्यां रुष्टस्तुष्टश्च भूपः उत्तराधिकारिणो निर्धारणावसरे ऊर्जं राज्ये ऽभ्यषेचयत्। शाक्यञ्च यौवराज्ये न्ययोजयत्। ज्येष्ठाय च मौर्याय देशाद् बहिः प्रान्तस्याधिपत्यम् प्रायच्छत्।

मौर्याय प्रान्ताधिपत्यं न रोचते। चेतसि सः राज्यायास्पृहयत्। एकदा क्रोधाविष्टः ऊर्जस्य विनाशाय स्व-भवनात् प्रचलितः। शाक्यः कथंचित् एतत् वृत्तम् अवागच्छत्। स्वकर्तव्यं परिपालयन् ऊर्जाय सर्वं वृत्तान्तं न्यवेदयत्।

नदी जलेन पूर्णा। सनौकाः नाविकाः तत्रातिष्ठन्। पथिकः कश्चित् त्वरमाणः नदीतीरम् आगच्छत्। शीघ्रम् नद्याः पारं गन्तुम् ऐच्छत्। नावम् आरोहत्। नाविकाः ऽपि त्वरितम् अपरं तीरं गन्तुं शीघ्रं नावं चालयन्ति स्म। मार्गः सुदीर्घः। प्रवाहोऽपि प्रबलतरः। जलं च गम्भीरम्।

यदा नौका प्रवाहस्य मध्ये प्राप्ता, तदा भ्रमितुमारभत। नाविकाधिपतिः अक्रुध्यत् अवदच्च, कश्चित् पापः नौकायां तिष्ठति। तस्य पापस्य कारणात् नौका जलस्य मध्ये मज्जनाय परिभ्रमति। पथिकस्त्रस्तोऽभवत्। नाविकाधिपतिः तम् एव पापं विज्ञाय, तस्य पथिकस्य बन्धनम् अकारयत् जले प्राक्षिपत् च तम्। पथिकस्य नाम मौर्योऽभवत्। अन्ये यात्रिणो रक्षिताः।

निजस्याग्रजस्येमं वृत्तान्तम् ऊर्जोऽप्यश्रृणोत्। मनसि खिन्नो अभवत्। ज्येष्ठस्य भ्रातुः राज्यकारणात् मरणं श्रुत्वा, स्वं शासनस्य त्यागाय निश्चयम् अकरोत्। शाक्यं च सिंहासनेऽभिषेक्तुमैच्छत्। शाक्योऽपि धर्मात्मा, ऊर्जस्यं निश्चयं श्रुत्वाकथयत्—"भ्रातः! पितृचरणाः तुभ्यमेव राज्यम् प्रायच्छन्। म चह्यं मन्त्रित्वम्। अतः पितु–राज्ञासत्या भवितुं नार्हति, इति। वर्षत्रयम् अतीतम्, न कोऽपि सिंहासनम् अध्यतिष्ठत्।

अथैकस्मिन् दिने क्षत–विक्षत–देहः ऊर्जः शाक्यस्याङ्के शिरः निधाय लेट्यति, वात्सल्येन विह्वलः शाक्योऽश्रुकणान् मुञ्चति। ऊर्जो व्याहरत्—'अग्रज ! त्वमेव जापानस्य भूपालताम् अङ्गीकुर्याः इति स्वदेहम् प्राहरम्। जीवनञ्च समाप्नवम्।"

शाक्यो भृशं व्यलपत्। ऊर्जः पञ्चत्वं प्राप्तः। विवशः शाक्यो जापानम् अशासत्।

अथ कदाचित् दयालुः धर्मात्मा शाक्यः उन्नतं प्रदेशम् आरुह्य नगरं प्रेक्षांचक्रे। अहहः ! परां खिन्नतां प्राप सः। राजधान्याः प्रभूतेभ्यः महानसेभ्यः धूमो न निस्सरति। व्यचारयत्–"नूनं निर्धनतया विपन्ना मे प्रजा ! निन्दनीयो ऽसौ भूपो, विपन्ना यस्य प्रजा। कः ईदृशे राज्ये वत्स्यति किमु उत्सादीयतुं भवेन्मे राज्यम्। धिकक्कार्योऽहम्। नाहम् शासनस्याधिकारी। किम् त्यजानि राज्यम्। न हि, भीरुतेयं स्यात्। अस्तु। विचारितम्। धनेन वर्धतां मे प्रजा। न हि स्वल्पमपि करं ताभ्यो हरिष्यामि।" इति चित्ते निश्चित्य परावर्त्तत।

त्रीणि वर्षाणि व्यतीतानि। राज-भवनानि जीर्णानि। न तेषां जीर्णोद्धारो भवति। नापि तानि सुधया संलिप्तानि। दुर्दशा सञ्जाता कुड्यानाम्। शाक्योऽपि सर्वस्मिन् दिने वारमेकं भुङ्क्ते अभिनवानि वसनानि च न धारयति।

अथ कदाचित् पुनरपि तं प्रदेशमारोहत्। हन्त ! समस्तेभ्यः महानसेभ्यः धूमरेखाः गगनं चुम्बन्ति। गृहमागत्य महाराज्ञीम् अकथयत्—"प्रसन्नोऽस्म्यद्य। विपुलं धनं मे जातम् इति। महिषी अवदत्—"नूनम् भग्नानि भवनानि जीर्णानि च वसनानि त्वामेवानुवदन्ति।"

शाक्योऽकथयत्—"मुग्धे ! नैतानि भवनानि वसनानि वा मे सम्पत्तिः। जनताद्य समृद्धिशालिनी। जनतास्माकं सम्पत्तिः। अतोहं सम्पत्ति-शाली !"

अथ जनसम्मर्दो राजद्वारे उपातिष्ठत् । विनीतो भूपालो ऽवातरत् जनताया: प्रतिनिधिरवदत्—'देव ! जीर्णानि राजभवनानि । न सहामहे । प्रजाया: अपमानम् इदम् । आदिशन्तु जीर्णोद्धारम् ।'

राजा—'अयि मम पालका: ! मा चिन्तयन्ताम् । भविष्यति जीर्णोद्धारो यथासमयम् ।"

जनताया: आग्रहेण सर्वं समपद्यत । अयमेव शाक्यो नयनतोषनाम्ना प्रसिद्धोऽभवत् । रामराज्यमिवास्यापि राज्यं जापाने प्रसिद्धम् ।

शब्दकोश:

अपत्यम् =सन्तान	त्वरमाण: =शीघ्रता करता हुआ
मज्जनम् =डूबना	गभीरम् =गहरा
पञ्चत्वं =मृत्यु	महानस: =रसोई
विपन्ना =दु:खी	कुड्याम् =दीवार
महिषी =रानी	अनुवदन्ति=समर्थन में बोल रही हैं ।

अभ्यास:

१ यथा-योग्य प्रश्नोत्तरों को साथ-साथ लिखो : —

प्रश्ना:	उत्तराणि
१. किं ते वयो मोहन ?	१. 'आणकद्वयम्'
२. अतीते वर्षे पञ्चदश-वर्षीयो अभवत् भवान् ?	२. 'द्वादश वर्षाणि, श्रीमन् !'
३. कदा प्रत्यागमिष्यति भवान् ।	३. 'अहमवादिषम्, श्रीमन् ।'
४. कस्यैतत् पुस्तकम् ?	४. 'अर्ध-होरायमिति तर्कयामि ।'
५. किं शुल्कमस्य पत्रस्य ?	५. 'मदीयं, श्रीमन् ।'
६. को वार्तालापं करोति ?	६. 'ओम्, श्रीमन् ।'

२ इस कथा को संक्षेप से संस्कृत में लिखो :—

संकेतः—भूपः राज्यमकरोत् । पुत्रानपृच्छत् । पुत्राणामुत्तरम् । शाक्यो युवराजः । मौर्यः प्रान्ताधिपतिः । नौकया पारगमनम् । नौका-व्यसनम् । ऊर्जस्य वैराग्यम् । आत्मघातः । प्रजायाः निर्धनता । कर-विमुक्तिः । जनता-प्रार्थनायां जीर्णोद्धारः ।

३ नीचे लिखे पदों में सन्धि करो और सन्धि का नाम भी लिखो :—

विच्छिन्न-पद	सन्धियुक्त पद	सन्धिनाम
जापान + अभिधाने	जापानाभिधाने	स्वर संधि (दीर्घ)
कनिष्ठे + अपत्ये	——	——
शाक्यम् + च	——	——
अवदत् + च	——	——
पथिकः + त्रस्तः + अभवत्	——	——
निजस्य + अग्रजस्य + इमम्	——	——
ऊर्जः + अपि + अशृणोत्	——	——
पितुः + आज्ञा + असत्या	——	——
अथ + एकस्मिन्	——	——
जीवनम् + च	——	——
प्रसन्नः + अस्मि + अद्य	——	——
न + एतानि	——	——
विनीतः + भूपालः + अवातरत्	——	——

४ पाठ के अन्तिम तीन अनुच्छेदों का अर्थ लिखो ।

५ संस्कृत में अनुवाद करो :—

श्री पं० जवाहरलाल न्यूयार्क जाते हुए लन्दन गए । न्यूयार्क जाते हुए श्री जवाहरलाल को राष्ट्रपति ने विदाई दी (प्र+स्थापि) । जाते हुए श्री जवाहरलाल ने सन्देश दिया—'युद्ध से कुछ नहीं मिलेगा । शान्ति से सभी सुखी होंगे ।' जाते हुए जवाहरलाल जी को माली ने लाल गुलाब का फूल (रक्तिम-स्थलपद्म) दिया । सिंह शिशु जाते हुए जवाहरलाल का मुख देखता है । जाते हुए जवाहरलाल में सब विश्वास करते हैं कि यह न्याययुक्त बात ही कहेंगे ।

षष्ठः पाठः

राजकुमारः सिद्धार्थः

पुरा किल अभवत् कपिलवस्तु नाम प्रसिद्धं नगरम्। तत्र शुद्धोदनो नाम राजा अशासत्। तस्य एक एव पुत्रः सिद्धार्थाभिधानः। स एव महात्मा गौतम-बुद्धः इति नाम्ना प्रसिद्धिं गतः।

राजकुमारः सिद्धार्थः आबाल्यात् साधु-स्वभावः। न हि संसारस्य भोगेषु अस्य स्पृहा। सर्वदैव अध्यात्मम् एव चिन्तयते। नास्मै शृङ्गारं रोचते, नापि नृत्यम्, गानं वा। नापि वीररसः एनम् आकर्षति। न शासनस्येच्छा, न राज्याभिवर्धनस्येहा।

महाराजः 'विरक्तोऽयं मा कुतश्चित् संन्यासी भवेत्' इति चिन्तया व्याकुलोऽभवत्।

एकस्मिन् दिने सिद्धार्थः पितुरनुज्ञया नगरस्यावलोकनाय मन्त्रिणा सह प्रतस्थे।

सिद्धार्थः ब्रह्मचर्यं पर्यपालयत। अतः न कदापि रुग्णोऽभवत्। असौ नैव जानाति किं नाम रोगः इति। मार्गे गच्छन् सः एकं रोगिणमपश्यत्। रोगस्य प्रबलतया अकम्पतासौ। महत् च कष्टमन्वभवत्। राजकुमारः मन्त्रिणम् ऊचे।

सिद्धार्थः—"कीदृशोऽयं मनुष्यः ?"

मन्त्री—"राजकुमार ! अयं रोगी।"

राजकुमारः—"रोगी ? रोगी को भवति ?"

मन्त्री—"राजकुमार ! आहार-विहारस्य अन्यथा प्रयोगेण जल-वायोः दोषेण, कीटकृमेः दंशनेन, वा वातपित्त कफानां विषमतया,

पूर्वजन्मनः कर्मभिर्वा मनुष्याः रुग्णाः जायन्ते। रोगस्य दशायां न किमपि कर्तुं पारयन्ते। अतः जनाः अस्य साहाय्यमाचरन्ति।"

राजकुमारः—"अहो! आश्चर्यम्! दुःखितोऽयं मानवः।" अथ अपर एकः वृद्धः अग्रतो अवतस्थे। तम् दृष्ट्वा राजकुमारः चकितो ऽभवत्। अपृच्छत् च—

राजकुमारः—"मन्त्रिन्! कोऽयम्। कथं कृशः वक्रश्च। मुखम् अस्य गर्तमयम्। केशाः श्वेताः। चलन् स्खलति। किमिदम्? अयमपि रोगः कश्चित् किम्?"

मन्त्री—"राजकुमार! वृद्धोऽयम्। सर्वे जनाः वृद्धाः भविष्यन्ति।"

राजकुमारः—"किम् अहमपि वृद्धो भविष्यामि। भवान् अपि च वृद्धो भविष्यति।"

मन्त्री—"आम्! राजकुमार! वयं सर्वे वृद्धाः भविष्यामः।"

(सिद्धार्थश्चिन्तितो ऽभवत्।)

(अथ बहवो जनाः एकं शवं स्कन्धेषु वहन्तः गच्छन्ति।)

राजकुमारः—"मन्त्रिन्! किमिदम्? किं वहन्ति जना इमे? किमिदं श्वेतेन वसनेन परिवेष्टितम्? किमर्थमसौ युवकः रुदन् गच्छति?"

मन्त्री—"राजकुमार! अस्मादृशः एव अयं जनः अम्रियत। अस्य प्राणाः निस्सृताः। अस्य सम्बन्धिनः मृतम् एनं श्मशाने नयन्ति। तत्रैनं धक्ष्यन्ति। एतावदेव अस्य मानवस्य जीवनम्।"

राजकुमारः—"किमहमपि मरिष्यामि?"

मन्त्री—"राजकुमार! सर्वेषां ध्रुवो मृत्युः।"

राजकुमारः—"मन्त्रिन्। पर्याकुलोऽस्मि! निवर्त्तयामः।"

संसारात् खिन्नोऽसौ सिद्धार्थः गृहम् अत्यजत्। तपोऽचरत्। आत्मानम् अबोधत्। अहिंसां प्राचारयत्। बौद्धमतस्य च प्रवर्तको-

ऽभवत् । सहस्रशो जनाः अस्य मतम् स्व्यकुर्वन् भिक्षवश्चाभवन् । सर्वोऽपि राजपरिवारः बौद्धधर्मम् अङ्गीचक्रे ।

शब्दकोशः

आबाल्यात् =बचपन से लेकर
स्पृहा =अभिलाषा
वसनम् =कपड़ा
अध्यात्मम् =आत्मा-संबन्धी
वक्रः =टेढ़ा
धक्ष्यन्ति =जला देंगे ।

अभ्यासः

१. नीचे दिए गए वाक्यों में कौनसा वाच्य है ? यथास्थान चिह्न लगाओ :—

वाक्य	कर्तृवाच्य	कर्मवाच्य	भाववाच्य
(क) महात्मा गौतम बुद्धः प्रसिद्धिं गतः ।	...		...
(ख) सिद्धार्थेनः ब्रह्मचर्यं पर्यपाल्यत ।	...		...
(ग) दुःखितोऽयं मानवः दृश्यते ।	...		...
(घ) युवकः रुदन् गच्छति ।	...		...
(ङ) जनेन म्रियते ।	...		...
(च) अस्य प्राणाः निस्सृताः ।	...		...
(छ) सिद्धार्थः तपोऽचरत् ।	...		...

२. जिन कृदन्त प्रत्ययों का प्रयोग निम्न शब्दों में हुआ है उन्हें अपनी कापी पर लिख कर गुरु जी को दिखाओ :—

प्रसिद्धं	—	दुःखितः	—
गतः	—	चकितः	—
विरक्तः	—	चलन्	—
रुग्णः	—	वृद्धः	—
कर्त्तुं	—	परिवेष्टितम्	—
रुदन्	—	निस्सृताः	—
खिन्नः	—	मृतम्	—

३. इन प्रश्नों के उत्तर लिखो :—

१. राजकुमारस्य सिद्धार्थस्य कीदृशः स्वभावः ?

२. महाराजस्य का चिन्ता आसीत् ?

३. सिद्धार्थः कानि कानि दृश्यानि अपश्यत् ?

४. राजकुमारः वृद्धं दृष्ट्वा मन्त्रिणम् किम् अकथयत् अपृच्छच्च ?

५. किमिदं श्वेतेन वसनेन परिवेष्टितम् ? इत्येतस्य प्रश्नस्य मन्त्रिणा किमुत्तरं दत्तम् ?

६. किमर्थं सः युवकः रुदन् गच्छति स्म ?

४. तुमने इस पाठ में कुछ सन्धियाँ पढ़ी हैं, इससे पहले कक्षा ७ में भी सन्धि-चर्चा कर चुके हो। इन संधियों के नाम तो बताओ—

सन्धिरहित	सन्धियुक्त	नाम
बोध+अनन्तरम्	—बोधानन्तरम्	...
राज्य+अभिवर्धनस्य	—राज्याभिवर्धनस्य	...
अति+इव	—अतीव	...
शासनस्य+इच्छा	—शासनस्येच्छा	...
अभिवर्धनस्य+ईहा	—अभिवर्धनस्येहा	...
अग्रजस्य+इमम्	—अग्रजस्येमम्	...
वृक्ष+उपरि	—वृक्षोपरि	...
शाक्य+ऊर्जाः	—शाक्योर्जाः	...
सर्वदा+एव	—सर्वदैव	...
कृष्णः+एकत्वम्	—कृष्णैकत्वम्	...
अथ+एकस्मिन्	—अथैकस्मिन्	...
परि+अपालयत	—पर्यपालयत	...
स्वी+अकुर्वन्	—स्व्यकुर्वन्	...
अनु+अभवत्	—अन्वभवत्	...
नौ+इकाः	—नाविकाः	...

पितुः+अनुज्ञया	—पितुरनुज्ञया	...
रुग्णः+अभवत्	—रुग्णोऽभवत्	...
कर्मभिः+वा	—कर्मभिर्वा	...
सिद्धार्थः+चिन्तितो	—सिद्धार्थश्चिन्तितो	...
रुष्टः+तुष्टः+च	—रुष्टस्तुष्टश्च	...
कनिष्ठे+अपत्ये	—कनिष्ठेऽपत्ये	...
शाक्यं+च	—शाक्यञ्च	...
अवदत्+च	—अवदच्च	...
पथिकः+त्रस्तः+अभवत्	—पथिकस्त्रस्तोऽभवत्	...

५. संस्कृत में अनुवाद करो :—

राजा का एक ही पुत्र था। पुत्र की सांसारिक कार्यों में रुचि न थी। पुत्र के स्वभाव से पिता चिन्तित था। सिद्धार्थ बौद्ध धर्म के प्रवर्तक थे। उन्होंने अपने धर्म में अहिंसा को पहला स्थान दिया है। राजा अशोक ने राज्य-धर्म के रूप में बौद्ध धर्म को अपनाया था।

६. उपर्युक्त पाठ में दी गई कथा के अतिरिक्त गौतम बुद्ध के विषय में तुम जो भी जानते हो उसे संस्कृत में लिखो। कम से कम १० पंक्तियाँ लिखकर अपने अध्यापक जी को दिखाओ।

७. नीचे दिए गए वाक्यों में भूतकाल (परोक्षे लिट् लकार्) का प्रयोग हुआ है, उन में प्रयुक्त धातु का संकेत करके वाक्यों का अर्थ लिखो :—

यथा :

(क) सर्वोऽपि राजपरिवारः बौद्धधर्मम् अङ्गीचक्रे।

चक्रेः— कृ, लिट् लकार्, प्रथम पुरुष, एकवचन।

वाक्यार्थ :—

समस्त राजपरिवार ने भी बौद्धधर्म को स्वीकार किया।

(ख) रामो राजा वभूव। ....

(ग) रामः पितुराज्ञया वनं जगाम। ... .

(घ) रामः विश्वामित्रस्य आश्रमे पपाठ। ....

(ङ) शिष्यः गुरुं नमश्चक्रे। ....

सप्तमः पाठः

दुर्ग-दौवारिकः

ततः संवृत्ते किञ्चिद् अन्धकारे भुशुण्डीं स्कन्धे निधाय, निपुणं निरीक्षमाणः, आगत-प्रत्यागतञ्च विदधानः, प्रताप-दुर्ग-दौवारिकः कस्यापि पाद-प्रक्षेप-ध्वनिम् अश्रौषीत्। ततः स्थिरीभूय पुरतः पश्यन् आगन्तारं कमपि अनवलोकयन्, गम्भीर-स्वरेण एवम् अवादीत्—"कः कोऽत्र भोः ? कः कोऽत्र भोः ?" इति।

अथ क्षणानन्तरं पुनः स एव पादध्वनिर् अश्रूयत। भूयोऽप्यसौ साक्षेपम् अवोचत् —'क एष माम् अनुत्तरयन् मुमूर्षुः समायाति बधिरः ?"

ततो—"दौवारिक ! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति बधिर इति च वदसि ?" इति कोऽप्यकथयत् न चादृश्यत।

"तत् किं न जानाति भवान् प्रभुवर्याणाम् आदेशो यद् 'दौवारिकेण त्रिःपृष्टोऽपि प्रत्युत्तरं यो न ददाति स हन्तव्य' इति।" —इत्थं भाषितं

द्वाःस्थेन । प्रत्युत्तरे च—"क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि"—इति कथयन्, द्वादशवर्षेण केनापि भिक्षुवटुनाऽनुगम्यमानः, कोऽपि काषायवासाः, भव्यमूर्तिः संन्यासी दृष्टः। ततस्तयोरेवम् अभूदालापः।

संन्यासी—"कथम् अस्मान् संन्यासिनोऽपि कठोरभाषणैस् तिरस्करोषि ?"

दौवारिकः—"भगवन् ! भवान् संन्यासी इति प्रणम्यते। परन्तु प्रभूणाम् आज्ञाम् उल्लङ्घ्य निजपरिचयम् अददद् एव आयाति इति आक्रुश्यते।"

संन्यासी—"सत्यं क्षान्तोऽयम् अपराधः। परमद्यावधिः संन्यासिनः पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्याः प्रवेष्टव्याश्च।"

दौवारिकः—"संन्यासिन् ! संन्यासिन् ! बहूक्तं, विरमाधुना। न वयं दौवारिकाः ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। किन्तु यो भारतीयानां रक्षा-व्रती, येन चायं भूमिः वीर-प्रसविनी इति उच्यते, तस्यैव महाराज-शिववीरस्य आज्ञां वयं शिरसा वहामः।"

संन्यासी—'अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीर-निकटे जिगमिषावः।"

दौवारिकः—"अलम् आलप्य अपि तत्। प्राह्णे महाराजस्य सन्ध्यो-पासनसमये भवादृशानां प्रवेश-समयो भवति, न तु रात्रौ ?"

संन्यासी—"तत्किं कोऽपि न प्रविशति रात्रौ ?"

दौवारिकः—"(साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचिता वा प्राप्त-परिचय-पत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः, ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्······"[इति कथयन्नेव तत्तेजसा इव धर्षितो मध्ये एव विरराम।]

संन्यासी—"(स्वगतम्) राजनीति-निष्णातः शिववीरः। सर्वथा दौवारिकता-योग्य एवायं द्वारपालः स्थापितोऽस्ति। परीक्षितम् अप्येनम्

एकस्मिन् विषये पुनः परीक्षिष्ये तावत् । (प्रकटम्) दौवारिक ! इत आयाहि, किमपि कर्णे कथयिष्यामि ।"

दौवारिकः—(तथा कृत्वा) "कथ्यताम् ।"

संन्यासी—"निरीक्षस्व त्वम् अधुना दौवारिकोऽसि । प्राणान् अगणयन् जीविकां निर्वहसि । त्वं सहस्रं वा अयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि संभाव्यते ।"

दौवारिकः—(सावेगम्) "आम् अग्रे, कथ्यताम् ।"

संन्यासी—"वयञ्च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन-तत्त्वं विद्मः ।"

दौवारिकः—"स्यादेवम् । अग्रे अग्रे ?"

संन्यासी—"तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः, तत अधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्, येन ताम्रं स्वर्णं विधातुं शक्नुयाः ।"

दौवारिकः—(साक्षेपम्) "हंहो ! कपट-संन्यासिन् !! कथं विश्वासघातं स्वामिवञ्चनञ्च शिक्षयसि ? ते केचन अन्ये भवन्ति जार-जाताः, ये उक्तोच-लोभेन स्वामिनं वञ्चयित्वा आत्मानम् अन्धतमसे पातयन्ति । न वयं शिवगणास् तादृशाः । (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथय, कस्त्वम् ? कुत आयातः ? केन वा प्रेषितः ?"

संन्यासी—(स्मित्वा इव) "अथ त्वं मां कं मन्यसे ?"

दौवारिकः—"अहं तु त्वाम् अस्यैव ससेनस्य आयातस्य अपजल-खानस्य······"

संन्यासी— (विनिवार्य मध्य एव) 'धिक् धिक् !"

दौवारिकः—"कस्याप्यन्यस्य वा गूढचरं मन्ये । तद् आदेशं पाल-यिष्यामि प्रभुवर्यस्य । (हस्तम् आकृष्य) आगच्छ दुर्गाध्यक्ष-समीपे, स एव अभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।"

ततः संन्यासी तु—"त्यज, नाहं पुनरागमिष्यामि, महाशयोऽसि, दयस्व, दयस्व !" —इति अनेकधा समकथयत्, तथापि दौवारिकस्तम् आकृष्य नयन्नेव प्रचलितः ।

अथ द्वारस्थ-प्रबल-प्रकाशस्य दीपस्य समीपे समागत्य संन्यासिनोक्तं—"दौवारिक ! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः ?" ततः दौवारिकः पुनस्तं निपुणं निरीक्ष्य, कर्कश-करग्रहम् अपहाय, सलज्ज इव च नम्रीभूय, प्रणमन्नुवाच—"आः ! कथं श्रीमान् गौरसिंह आर्यः ? क्षम्यताम् अनुचितव्यवहार एतस्य ग्राम्य-वराकस्य ।" तद् अवधार्य तस्य पृष्ठे हस्तं संस्थाप्य संन्यासिरूपो गौरसिंहः समवोचत्-"दौवारिक! मया बहुशः परीक्षितोऽसि ज्ञातोऽसि यथायोग्य एव पदे नियुक्तः इति । त्वादृक्षा एव प्रभूणां पुरस्कार-भाजनानि भवन्ति, लोकद्वयञ्च विजयन्ते ।"

शब्दकोशः

भुशुण्डी	=बन्दूक	आगत-प्रत्यागतम्	= परेड़, चहल-कदमी
मुमूर्षुः	=मरणेच्छुक,		
परिचय-पत्रम्	=पहिचान—कार्ड	रसायन	=कीमिया, स्वर्णादि निर्माण की औषध
परिष्कृतम्	=शोधा या मारा		
जारजाताः	=हराम ज़ादे	उत्कोचः	=रिश्वत ।
महाशयः	= उदार हृदय वाला		

अभ्यासः

१ (क) संन्यासी और दौवारिक का वार्तालाप लिखो । संन्यासी कौन था ? दौवारिक ने उसे कैसे पहचाना !

(ख) संन्यासी ने दौवारिक को क्या प्रलोभन दिया था ? दौवारिक ने क्या कह कर अपमान किया ? क्यों ?

(ग) दौवारिक ने कर्त्तव्य-पालन किया था, फिर अपने व्यवहार को अनुचित क्यों कहा और क्षमा क्यों मांगी ?

२ संस्कृत में उत्तर दो

(क) आगत-प्रत्यागतं विदधानः दौवारिकः किम् अश्रौषीत् ?

(ख) दौवारिकः संन्यासिने कदा कदा अकुप्यत ?

(ग) संन्यासिना दौवारिकं परीक्ष्य को निर्णयः दत्तः ?

३ नीचे लिखे शब्दों के अर्थ लिखो और वाक्य बनाओ:—
दौवारिकः, वधिरः, भव्य-मूर्त्तिः, अद्यावधिः ।

४ इन समासों का विग्रह और नाम बताओ :—
आगत-प्रत्यागतम्, गम्भीर-स्वरेण, पाद-ध्वनिः, रक्षा-व्रती, वीर-प्रसविनी, प्राप्त-परिचय-पत्रः, राजनीति-निष्णातः ।

अष्टमः पाठः

राज-प्रबन्धः

पुरा किल भारते राजवंशीय एकश्चक्रवर्त्ती राजा बभूव। सः च कुल-क्रमागतः प्रजा-समर्थितश्च । तस्य द्वौ गुणौ बभूवतुः । परमो विद्वान् वेद-वेदाङ्ग-ज्ञाता, वीरो न्यायरक्षकश्च ।

विशालस्य देशस्य व्यवस्थायै तिस्रः सभा बभूवुः । एका राज-सभा । द्वितीया विद्या-सभा । तृतीया खलु धर्म-सभा । भारतीयं राज्यं गणराज्यम् इत्यकथ्यत । गणानां प्रतिनिधयः राजसभायां सम्मिलिताः बभूवुः । अनुगणं तेषां संख्या एकपञ्चाशत् एकषष्ठिर्वा अनुमीयते । विद्या-सभायां तु विद्वांसः ख्यातनामानः सभासदः भागं लेभिरे । तेषां संख्या तु न्यूना; एकविंशतिः, एकत्रिंशत् वा कल्प्यते । धर्म-सभायां तु आचार-निपुणाः धर्मात्मानः एवाधिकृताः । न तेषु अधिको विवादः । ते तु एका-दश अपि धर्म-निर्णयं चक्रुः । द्वादशानाम् अपि अपेक्षा नैवाभूत् ।

चत्वारो वर्णाः चत्वारश्च आश्रमाः स्वस्वधर्मान् निमयांश्च पालयेयुः, वेदांश्च नित्यम् अधीयीरन्, ईशं च भजेरन्, आचारवन्तः सुखं समृद्धिं च लभेरन् इत्येव लक्ष्यं राज्यस्य ।

न मे स्तेनो जनपदे न कदर्यो, न मद्यपः ।
नानाहिताग्निः, नाविद्वान् न स्वैरी, स्वैरिणी कुतः ? ॥

इत्यासीत् घोषणा अश्वपतेः मानवशास्त्र-प्रतिपालकस्य ।

तेषु दिवसेषु प्रशंसनीया धार्मिकाः वीरा न्यायप्रिया राजसभायाः सभासदः आसन् । विद्या-सभायाः महाविद्वांसः सदाचारिणः, धर्म-सभायाश्च धार्मिका विद्वांसः सभासदः आसन् ।

सभानां न्यूनान्यूनं त्रयः, ततः परं दश, अधिकाः वा सभ्या अभवन् । तेषु चतुर्णां वेदानां ज्ञातारः षण्णां शास्त्राणां च वेत्तारोऽपि बभूबुः । तेषामेव मतं सम्मतम् अभूत् । सर्वे एव तत्र विद्वांसः सभासदः । ते विद्यात्रय-युक्तां त्रयीं-विद्यां, दण्डनीतिं, आन्वीक्षिकीम् ब्रह्म-विद्यां, वार्त्तारम्भांश्च इति सप्तविद्याः अबोधन्त । तेषु केचिद् योगाभ्यासेन साक्षात्कृत-धर्माणो, निस्स्पृहाः परोपकारैकधनाः अपि आसन् ।

'सर्वे दश कामजान्—१. मृगया, २. द्यूतम्, ३. दिवाशयनम्, ४. पर-निन्दा, ५. स्त्री-सेवनम्, ६. मदः, ७. नृत्यम्, ८. गानम्, ९. वादनम्, १०. वृथा भ्रमणम्—इति एतान् दोषान् परिहरेयुः । अष्टौ च क्रोधजानि—१. पैशुन्यम्, २. बलात्कारः, ३. द्रोहः, ४. ईर्ष्या, ५. असूया ६. अर्थदूषणम्, ७. वाक्पारुष्यं, ८. कायपारुष्यम् इति एतानि व्यसनानि दूरतस्त्यजेयु' रिति राज-नियमः कठोरतया पर्यपाल्यत । शासन-व्यवस्था-सञ्चालनाय अष्टौ शास्त्रज्ञान् शूरान् कुलीनान्, परीक्षितान् मन्त्रिणः प्रकुर्वीत । तैः सार्धम् नित्यं-चिन्तयेत् अध्यक्षसहितानां तेषां सभासदां नव संख्या भवति । सभायां विषमसंख्यैव उपयुक्ता, समाने मतविभाजने समसंख्यया निर्णयस्य कर्तुमशक्यत्वात् ।

सभायाः निर्णयानां प्रसाराय रक्षा-विभागो भवति । तदर्थं द्वयोः, त्रिषु, पञ्चसु, दशसु, शतेषु, सहस्रेषु वा संख्यासु यथावसरम् आरक्षिकाः स्थाप्येरन् इति मानवो निर्णयः । तत्र च ग्रामे ग्रामे एकः प्रधान-पुरुषः ग्रामाधिपतिः निर्धारणीयः । दशसु दशग्रामाधिपतिः, विंशत्यां विंशति-ग्रामाधिपतिः, सहस्रे सहस्रग्रामाधिपतिः च स्थापनीयः ।

मनोर्व्यवस्थानुसारमद्यापि ग्रामे एकः पट-भूलेखकः, दशसु ग्रामेषु आरक्षिका, द्वयोः आरक्षिकयोः महारक्षिका, पञ्चसु आरक्षिकासु एकस्त-हसीलः, दशसु तहसीलेषु एकः प्रान्तो निर्धारितो भवति । स्वराज्यकाले राज्यानां संख्याविवर्धनात् प्राक्तनीयायां व्यवस्थायां परिवर्तनमपि अक्रियत । सारभूतः सिद्धान्तस्तु स एव ।

अधिकारिणश्च स्व स्व वृत्तम् आत्मनो ज्येष्ठाय निवेदयन्ति । एकस्य ग्रामस्य प्रधानः दशग्रामाधिपतिम्, सः विंशतीशम्, सः शतेशम्, स च सहस्रपतिम्, स च दशसहस्रेशाय, सः च लक्षग्रामसभायै दैनं-दिनं ज्ञापयेरन् । सर्वाः देशसभाः चक्रवर्ति-महाराजसभायां भूगोलव्यवस्थां श्रावयेयुः विचारयेयुश्च ।

अद्यत्वे तु संयुक्तराष्ट्रसंघः मानव-मात्रस्य त्रिंशद् अधिकारान् घोषयित्वा यथा-संभवं रक्षितुं यतते । प्राक्तनेषु युगेषु किमपीदृशं संगठनं विविधैः राष्ट्रैः कृतमासीद् वा न वा इति तु न इतिहासज्ञैः ज्ञाप्यते ।

शब्दकोशः

गणः	= समुदाय	अनुगणम्	= समुदाय की विशालता के अनुसार
ख्यातनामा	= प्रसिद्ध नाम वाला;	स्तेनः	= चोर;
कदर्यः	= कंजूस;	मद्यपः	= शराबी
अनाहिताग्निः	= जिसके घर में विधि-पूर्वक हवन की आग न रखी गई हो;	स्वैरी	= स्वैच्छाचारी, उच्छृंखल;

त्रयी =ऋक् यजुः व साम; आन्वीक्षिकी=दर्शनशास्त्र;
दण्डनीति = राजनीति; वार्तारम्भाः = खेती-वाड़ी आदि उद्योग धन्धे
पैशुन्य =चुगली; आरक्षिका = पुलिस, थाना;
पट-भूलेखकः = पटवारी;

अभ्यास

१ पाठ में संख्याएँ आई हैं उनके ज्ञान से १०० तक संख्याएँ लिखो :—
ध्यान रखो — दश के आगे एकादश आदि बनेंगे । 'द्विदश' का 'द्वादश' 'षड्दश' का 'षोडश और 'अष्टौ दश' का 'अष्टादष' हो जाता है । इसी प्रकार आगे होता जाता है ।

२ पूरणी संख्याएँ क्रमवाची संख्याएँ कहलाती हैं, तुम्हारी संस्कृत-दीपिका के प्रत्येक पाठ के साथ पूरणी संख्या है । १०० तक पूरणी संख्याएँ लिखो ।

इन पूरणी संख्याओं के स्त्रीलिङ्ग वनाने के लिए पहले तीन के अन्त में 'आ' लगता है, शेष में 'ई' लगती है । जैसे—प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी आदि ।
नपुंसक में फलम् की तरह प्रथमं, द्वितीयं, तृतीयम् आदि बनेंगे ।

पूरण-संख्या में विंशति वाले और अगली सब पूरण संख्याओं में तीनों लिङ्गों में दो-दो रूप बनते हैं । जैसे—

पुंल्लिङ्ग	स्त्रीलिंग	नपुंसकलिंग
एकोनविंशः	=एकोनविंशी	—एकोनविंशम्
या एकोनविंशतितमः	=एकोनविंशतितमी	—एकोनविंशतितमम्

३ नौ वाली संख्या को तीन प्रकार से लिखा जाता है—
नवदश छात्राः ।
या एकोनविंशतिः छात्रा ।
या ऊनविंशतिः छात्राः ।

इसी तरह की तीनों प्रकार की संख्याएँ लिखो :—
२९ छात्राएँ, ३९ छात्र, ४९ अध्येता, ५९ छात्र, ६९ छात्र,
७९ छात्र, ८९ विद्यार्थी, ९९ आम ।

४ हिन्दी में अनुवाद करो :
शतं छात्राः अधीयते । शतं बालाः शालायां पठन्ति । वृक्षात् शतं फलानि पतन्ति । द्विशतं बालाः परीक्षासु अनुत्तीर्णाः । द्विशतं फलानि गलितानि । सहस्रं सत्याग्रहिणः गृहीताः । सहस्रं सेनाः समाप्ताः । सहस्रं पुस्तकानि पुस्तकालये सन्ति ।

पञ्चविंशत्यै अध्यापकेभ्यो वेतनं दत्तम् ।
शतस्य छात्राणां प्रतिदिनम् आशुरथेन गमनं भवति ।
चतुश्चत्वारिंशतः अक्षराणां भिन्नं छन्दो भवति ।

५ दश, विंशति आदि स्वरान्त संख्यावाची हैं । त्रिंशत्, चत्वारिंशत् आदि हलन्त संख्यावाची हैं, १९ से ऊपर के संख्या-वाची शब्दों का रूप एकवचन में ही रहता है—इस नियम को ध्यान में रख कर अनुवाद करो :—

(क) बाईस बालकों के लिये पुस्तक लाओ ।
(ख) सौ मनुष्यों के ये वस्त्र हैं ।
(ग) पैंतालीस फलों का रस निकालो ।
(घ) पैंतीस देवियों के लिये साड़ियाँ ले आओ ।
(ङ) शिकारी ने ७२ पक्षियों को मारडाला ।
(च) सौ बालकों के लिये निमन्त्रण है ।

६ संस्कृत में अनुवाद करो :—
(क) २५ सैनिकों को शत्रु ने पकड़ लिया ।
(ख) ३४ ब्राह्मणों के लिये मिठाई लाओ ।

(ग) इस सभा में आठ मन्त्री हैं।

(घ) ६५ यात्रियों से डाकुओं ने धन हर लिया।

(ङ) ७०० सैनिकों के साथ सेनापति ने देश की रक्षा की।

(च) पांचवीं कक्षा में कितनी बालिकायें हैं।

(छ) चालीसवीं कन्या को बुलाओ।

नवमः पाठः

मूर्खैः कृतं चातुर्यम्

[क] चतुरो व्यापारी

कश्चित् वणिजः सुतो अभवत्। एकदा सः वाणिज्याय देशान्तर-स्थं द्वीपम् अगच्छत्। तस्य पार्श्वे बहुमूल्यानि अगुरु-काष्ठानि आसन्।

कश्चिद् अपि द्वीप-वासी तत्र तेषां क्रयं न करोति, यतो हि कश्चिद् अपि अगुरुं न जानाति। नैव च तस्य सुगन्धम् अपि बोधति। सः परं दुःखितः अभवत्। अथ भृशं चिन्तयमानः सः उपायम् एकम् अपश्यत् तथैव चाकरोत्।

किंचित् कालानन्तरं स व्यापारी गृहं प्रत्यागच्छत्। स्वं कौशलं च अशंसत। लोकोऽपृच्छत्—'कथं अनिच्छत्सु जनेषु अगुरु-विक्रयस्त्वया कृतः?' स उवाच—'तत्र कृष्णेन्धनं विक्रीयते स्म। मयापि अगुरु-काष्ठं दग्ध्वा अङ्गारेषु विपरिणतम्। तच्च कृष्णेन्धन-रूपेण विक्रीतम्। लोकोऽहसत्—'अहो चातुर्यम्! मूल्यस्य शतांशमपि न लब्धं, तत् किम्? व्यापारी विक्रय-रहितस्तु नातिष्ठत्।'

[ख] तिलकार्षिकः

अथ एकदा कश्चित् कृषीवलः तिलान् भूमौ अवपत् । परेशकृपया प्रसंख्याताः तादृशाः एव तिलाः उत्पन्नाः । तान् खादन् स तेषु कटुकं स्वादम् अन्वभवत् ।

अथ कदाचित् भृष्टान् तिलान् अभक्षयत् । ते च स्वादुतराः मधुराः च । चेतसि अतीव प्रसन्नः अभवत् । व्यचारयत् ईदृशाः मधुराः तिलाः कथम् उत्पतेयुः ? स्व-मत्यनुसारं स भृष्टान् एव तिलान् भूमौ अवपत् । स्वाभाविकं ननु, यद् एकोऽपि तिलो नैव अजायत ।

[ग] कृषकस्य अलङ्करणम्

कस्यांचित् रात्रौ चौराः राजकुले महद् अलंकरणम् अलभन्त । तैः नगराद् बहिः क्षेत्रे गर्तं विधाय तत्र तद्धनं स्थापितम् ।

अथ प्रातः कश्चित् ग्राम्यः भूमिं खनन् तानि अलंकरणानि अलभत । चेतसि ईश्वराय धन्यवादान् अयच्छत् । तैः अलंकरणैः तत्रैव स्वभार्याम् अभूषयत् । राज्ञः अलंकरणानि तु सामान्यतः अलभ्यानि भवन्त्येव । न कदाचित् पूर्वं तादृशानि तेन अवलोकितानि ।

हारं स्थूलम् अपश्यत्, भार्यायाः जघनस्थले न्यक्षिपत् । मेखलां तस्याः शिरसि अकरोत् । करयोः नूपुरौ, कर्णयोः च कङ्कणौ ।

लोकः विचित्रैः अलंकरणैः चित्रितां भार्याम् अपश्यत् । उच्चैर् अहसत् । अलंकारलम्बकं च प्राशंसत् ।

अथ तत्र जनसमूहः एकत्रितः समभवत् । राजपुरुषाः च वृत्तान्तमेतत् राजकुले न्यवेदयन् । राजा सर्वाणि अलंकरणानि अपाहरत् । तं च अलंकार-लम्बकं दण्डयित्वा, अचौरत्वं चास्य विभाव्य अमुञ्चत् । लोकः तस्य मौर्ख्यम् उपाहसत् । सोऽपि स्वभाग्यम् अनिन्दत् । 'अनधिकार-चेष्टा, प्रदर्शनं च उभावपि दुःखाय भवतः' इति सर्वैः ज्ञातम् ।

[घ] स्वादु-भोजी

कस्यचिद् ग्रामवासिनो जनस्य एकः नगर-वासिमित्रम् अभवत्, यः तम् स्वगृहे न्यमन्त्रयत्, स्वादूनि च लावणिकानि भोजनानि अभोजयत् ।

ग्राम्योऽपृच्छत् —मित्र ! केन बहुमूल्येन पदार्थेन तव भोज्यानि स्वादूनि । मे ज्ञापय किम् तत् ?'

तदा सुहृद् अवदत्—"मित्र ! मिष्ठान्नेभ्यः लावणिकानि स्वादुतराणि भवन्ति एव । तानि च लवणादिभिर् उपस्कारैः निर्मितानि रसोत्पादकानि जायन्ते ।"

सोऽपि गृहं प्रत्यागत्य, पिष्टस्य लवणस्य एकां मुष्टिम् मुखे प्राक्षिपत् । तत् चूर्णं तस्य दुर्बुद्धेः ओष्ठौ श्मश्रूणि च अलिपत् । मुखस्य स्वादञ्च अनाशयत् । जनस्तम् अवलोक्योच्चैर् अहसत् । कारणे च पृष्टेऽसौ व्यज्ञापयत्—'मिष्ठान्नात् लावणिकं तु स्वादुतरं भवति । परं न लवणं शर्करायाः स्वादुतरमिति किम् आश्चर्यम् ?'

शब्दकोशः

वाणिज्याय=व्यापार के लिए
क्रयम्=खरीद
कृषीवलः=किसान
नूपुरः=बिछवे
ग्राम्यः=गँवार ।
अगुरु=अगर
तिलकार्षिकः=तिल वोने वाला
भृष्टान्=भुने हुओं को
अलंकारलम्बकः=जेवर लटकाने वाला ।

अभ्यासः

१ नीचे लिखे प्रश्नों के उत्तर संस्कृत में दो :—

(क) वणिक्सुतः किंनिमित्तं अगुरुं दग्धवान् ?
(ख) भृष्ट-तिल-वपने किम् उद्देश्यं कृषीवलस्य ?

(ग) गर्त-लब्धानाम् अलंकरणानाम् उपयोगे कृषकस्य चेष्टा कीदृशी किं च लक्ष्यम् ?

(घ) लवणस्य मुष्टिका ग्राम्येन स्वमुखे किं विचार्य प्रक्षिप्ता ?

२ इन चारों लघुकथाओं के मूर्ख नायकों द्वारा गलत निर्णय लिये गये, जिसके कारण वे हास्यास्पद बने। क्या तुम बता सकते हो कि प्रत्येक के सोचने में क्या-क्या गलती थी ?

३ निम्नांकित वाक्यों के वाच्य का निर्णय करो :—

	वाच्य (कर्तृ०, कर्म० या भाव०)
(क) सः परं दुःखितोऽभवत् ।	कर्तृ वाच्य
(ख) सः उपायमेकमपश्यत् ।	....
(ग) अगुरु-विक्रयस्त्वया कृतः ।	....
(घ) कृष्णेन्धनं विक्रीयते स्म ।	....
(ङ) मयापि अगुरु-काष्ठम् अंगारेषु विपरिणतम् ।	....
(च) तच्च कृष्णेन्धन-रूपेण विक्रीतम् ।	....
(छ) मूल्यस्य शतांशमपि न लब्धम् ।	....
(ज) असंख्याताः तिलाः उत्पन्नाः ।	....
(झ) चौराः अलङ्करणम् अलभन्त ।	....
(ञ) तैस्तद् धनं क्षेत्रे स्थापितम् ।	....
(ट) तेन तादृशानि न पूर्वम् अवलोकितानि ।	....
(ठ) सर्वैः ज्ञातम् ।	....
(ड) सर्वैः व्यापाराय गम्यते ।	....

ध्यान रहे, जहां क्रिया-पद कर्ता को कहता है वहां कर्तृवाच्य, जहां कर्म को कहे वहां कर्मवाच्य, और जहां वाक्य में अनुपस्थित भाव को कहे तब भाववाच्य। यह भी याद रखना कि वाक्य में कर्म के न होने पर भाववाच्य होता है, पर कर्ता के न होने पर प्रायः कर्मवाच्य होता है,

भाववाच्य भी हो सकता है, किन्तु कर्तृवाच्य की संभावना नहीं के बराबर होती है। उदाहरणार्थ—

कर्ता	कर्म	अधिकरण	क्रियापद	
×	पाठः	कक्षायाम्	अपठ्यत	(कर्मवाच्य)
×	×	कक्षायां	पठ्यते	(भाववाच्य)
×	पाठं	कक्षायाम्	पठन्ति स्म	(कर्तृवाच्य)

स्पष्ट है कि अन्तिम वाक्य में कर्ता के उल्लेख की अपेक्षा बनी रहती है। हां, मध्यमपुरुष और उत्तमपुरुष के प्रयोगों में कर्ता की अपेक्षा क्रिया से ही पूरी हो जाती है। जैसे --

पाठं कक्षायाम् पठामि/पठसि।

४ निम्नलिखित प्रश्नों के उत्तरों का सही क्रम लिखो :—

प्रश्न	उत्तर	सही क्रम
१. कुत्र पठसि ?	१. सप्तम्यां श्रेण्यां पठामि।	(......)
२. कस्यां श्रेण्यां पठसि ?	२. इन्द्रप्रस्थनगरे वसामि।	(......)
३ कस्मिन् नगरे वससि ?	३. प्रातः पञ्चवादने गच्छामि।	(......)
४. कदा स्वपिषि ?	४. राजकीय-पाठशालायां पठामि।	(...)
५. भ्रमणाय कदा गच्छसि ?	५. रात्रौ सार्ध-नव-वादने शये।	(......)

५ कोई और लघु-कथा जो तुम्हें स्मरण हो और हास्योत्पादक हो, संस्कृत में लिखो।

दशमः पाठः

कलहे न कस्यापि लाभः

अथ कदाचिद् द्वौ विडालौ भोजनाय इतस्ततो अभ्रमताम् । तौ कस्यचिद् धनिकस्य गृहम् आगच्छताम् । गृहे द्वे वातायने अभवताम् । उभेऽपि वातायने आरोहताम् । गृहस्य मध्ये एकम् स्थूलं मोदकम् अपश्यताम् । परस्परं चक्षुषा मोदकम् अदर्शयताम् ।

युगपदेव मोदकम् अभ्यपतताम् । मोदकस्य द्वे शकले अभवताम् । एकैकं शकलं करेण अधरताम् अधावताम् च । गृहाद् बहिरागत्य अन्योऽन्यस्य शकलम् आलोकयताम् ।

कृष्णः विडालः—"अयि मित्र ! तव शकलं विशालम् । अतो ममापि अस्मिन् शकले भागः ।"

पिङ्गलः विडालः—"न हि एतत् सत्यं भाति, मित्र ! विशालं तु त्वदीयम् एव । मम तु ह्रस्वम् । न्यायेन तु भवतां शकले मम भागः ।"

कृष्णः विडालः—यदि तव शकलमल्पम्, मदीयं चानल्पम् तर्हि एहि, परिवर्तयामः ।"

पिङ्गलः—"परिवर्तनम् तु न शोभते । तव परिश्रममहं किमर्थम् अपहराणि । स्पष्टमेव मम शकलमल्पम् । अतः स्वशकलात् किञ्चिद्दीयताम् ।"

कृष्णः—।'विचित्रमेतत् । यदि तव शकलमल्पम् तर्हि परिवर्तनमेव स्वीकुरु ।"

अत्रान्तरे कश्चित् वानरः तावलोकयति, तत्रागच्छति वदति च—

वानरः—"अयि विडालौ ! कीदृशोऽयं युष्माकं कलहः, वयस्यौ युवाम् । वयस्ययोः कलहो न शोभते ।"

विडालौ—"महामान्य ! हितमादिशति भवान् । परम् अन्यायं न मर्षयामः ।"

वानरः—"युवयोः कस्य अन्यायः ?"

उभौ विडालौ—(अन्योऽन्यं निर्दिशतः) "अस्य अन्यायः" ।

वानरः—"कथमिव ?"

कृष्णः—"देव ! अस्य शकलं विशालम् । न्यायेन च समानो भागो विधेयः । यतो हि आवाम् समकालम् एव शकलम् अपश्याव । समकालमेव अभ्यपताव । त्वरया च यावत् हस्तगतम् अभवत् तावदेव गृहीत्वा गृहाद् बहिरागच्छाव, इत्यस्मिन् विषये भवन्तः प्रमाणम् ।"

पिङ्गलः—"न हि देव ! अयम् असत्यं वदति । अस्य शकलम् विशालम् । मम च ह्रस्वम् । तस्मिन् समये कोलाहलम् न अकुर्वम्, अन्यथा गृह-स्वामी ताडयेत् । मम अधिकारः अधिकस्य, परम् अयं समानम् अपि न यच्छति । अत्र श्रीमन्तः प्रमाणम् ।"

वानरः—"सज्जनयोः कलहो न शोभनः । अहं युवयोः निर्णायको भवामि । तुलया समानं भागं विभजानि ।"

(वानरः तुलायाम् शकले तोलयति, पिङ्गलस्य विशालम् । तुलापटलमधः गच्छति) ।

कृष्णः—"अहं सत्यमवदम् । अस्य विशालम् ।"

पिङ्गलः—(ससंभ्रमम्) "अस्तु मम एव शकलं विशालम् । अहं मौनम् आकलयम्, अतः मम अधिकः भागः । न्यायो जातः । अधिकं न्यायम् नेच्छामि ।"

वानरः—"निर्णायकस्य समीपे अन्यायो न भविष्यति । त्वं मिथ्या अवदः । अतः दण्डनीयः । परं दयया त्यजानि । समानं च विभजानि, येन अन्यायो न भवेत् ।"

कृष्णः---(प्रसन्नः) "भवान् न्याय-प्रियः। अन्यायं नेच्छति। समानं कुरु देव!"

(अथ वानरः विशालात् किञ्चित् भक्षयति। ततः तोलयति, अपरम् अधिकं भवति)।

अपरस्माद् किंचित् भक्षयति। पूर्वम् अधिकं भवति। एवं कृते स्वल्पं मोदकम् अवशिष्यते)।

कृष्णः---"अहम् अल्पेन एव सन्तुष्टः। अलम् अतिन्यायेन।"

वानरः---(सरोषम्) "नाहं मोदकम् इच्छामि। युवयोः कलहो न भवेद् इति आगच्छम्। यदि युवयोः न्यायो जातः तर्हि यच्छतम् मे पारिश्रमिकम्।"

उभौ---(साश्चर्यम्) आवाम् अकिञ्चनौ, किं यच्छावः पारिश्रमिकम्। आवाम् बुभुक्षितौ, देहि आवाभ्यां मोदकम्!

वानरः---'न्यायाधीशस्य पारिश्रमिकम् आवश्यकम्। अस्तु यदि अकिञ्चनौ, तर्हि एते शकले एव मम पारिश्रमिकम्। एतेन एव सन्तोषं करिष्यामि।"

इति सर्वं मोदकं भक्षयति वानरः। उभौ विडालौ आक्रोशतः कथयतः च---

"मिथः कलहे न कोऽपि लाभः।"

शब्दकोशः

विडालः	=बिलाव	पिंगलः	=सफेद
वातायनम्	=झरोखा	मर्षयामः	=हम सहन करते हैं
युगपत्	=एक साथ	तुला	=तराजू
शकलम्	=टुकड़ा	ससंभ्रमम्	=घबराहट के साथ

अभ्यास

१ निम्नांकित वाक्यों में कौन से कर्तृवाच्य में हैं, कौन से कर्मवाच्य में हैं और कौन से भाव-वाच्य में हैं। छाँटो तो :—

वाक्य	वाच्य
विडालौ इतस्ततो ऽ भ्रमताम् ।	कर्तृवाच्य
तौ मोदकौ अपश्यताम् ।	...
ताभ्यां मोदको ऽदृश्यत ।	...
अन्यायं न मर्षयामः ।	...
अन्यायो न मृष्यते ।	...
निर्णायको न भवामि ।	...
निर्णायकेन भूयते ।	...
अहं मोदकं त्रोटयामि ।	...
मया मोदकः अत्रोटयत ।	...
मोदकः त्रुटयते स्वयमेव ।	...
अहं पत्रं पठामि ।	...
मया पत्रे पठ्येते ।	...
पत्रे पठ्येते स्वयमेव ।	...
अहं शये ।	...
आवाभ्यां शय्यते ।	...
मया लिख्यते ।	...
त्वया पठ्यते ।	...
तेन गम्यते ।	...

२ निम्न वाक्य कर्मवाच्य में रचे गए हैं। इन वाक्यों में उपयुक्त क्रिया लगाओ :—

मया ग्रामः पठ्यते/गम्यते ।

त्वया लेखः लिख्यते/चित्र्यते ।

रामेण विद्यालयः अचल्यत/अगम्यत ।

छात्रैः गीता अश्रूयत/अक्षिप्यत ।
अस्माभिः चित्रं पठ्यते/दृश्यते ।
युष्माभिः भोजनम् अक्रियत/अभक्ष्यत ।

३ निम्न पदों का वाक्य में प्रयोग करो :—

वातायनेन । शकलम् । तुलया । ससंभ्रमम् । पिंगली ।

४ संस्कृत में अनुवाद करो :—

कर्मवाच्य	कर्तृवाच्य
छात्रों से पाठशाला जाई जाती है ।	छात्र पाठशाला जाते हैं ।
अध्यापकों से छात्र पढ़ाये जाते हैं ।	अध्यापक छात्रों को पढ़ाते हैं ।
तुम से लेख लिखा गया था ।	तुम ने लेख लिखा था ।
हम से भोजन खाया जायेगा ।	हम भोजन खायेंगे ।
उन से खेल खेले गए ।	वे खेल खेलते थे ।
तुम से पुस्तकें पढ़ी जायेंगी ।	तुम सब पुस्तकें पढ़ोगे ।

५ संस्कृत में अनुवाद करो; ध्यान रहे, ये सब वाक्य कर्मवाक्य में हैं ।

मुझ से पुस्तक पढ़ी जाती है ।
हम से ग्राम जाया जाता है ।
पिता से दोनों पुत्र देखे जाते हैं ।
अध्यापक से छात्र पीटे जाते हैं ।
अध्यापकों से दो श्रेणी पढ़ाई जाती हैं ।
तुम से रोया जाता था ।
भक्त से नमा जाता है ।
भक्तों से वन्दना की जाती है ।
पापियों से रोया जायेगा ।

एकादश: पाठ:

बोधिसत्त्वस्य मत्स्यजन्म

बोधिसत्त्व: किल कस्मिश्चित् कमलविभूषिते प्रभूतसलिले नाना-जलचरोपशोभिते तीरान्त-तरु-कुसुमावकीर्णे सरसि मत्स्याधिपति र्बभूव। जन्म-जन्मान्तरेषु स्वोदात्त-संस्कारै: परहितसाधनैकतत्परो निजजीवने-नैव स्वराद्धान्त-प्रचिचारिषु: विविधानि जन्मानि लेभे। तत्र सहस्रशो-ऽपत्यानि कुटुम्बिनो बन्धुबान्धवाश्च तस्य वशंवदा बभूवु:। महासत्त्वो बोधिसत्त्वोऽपि तेषां स्वेषाम् अन्येषां च मीनानाम् परमनुग्रहं चकार। तेन परित: परिपाल्यमानं मीनकुलं परां वृद्धि जगाम।

अथ कदाचित् सत्त्वानां दौर्भाग्योदयाद् प्रमादात् च देवपुत्राणां न सम्यक् देवो ववर्ष। तत्सरोऽपि अल्पेनैव कालेन स्वल्प-सलिलं पल्वलं प्रपेदे। प्रचण्डे चण्डरश्मौ, अभितप्ते सैकततले, वाति च ग्रैष्म-झंझावाते पल्वलजलम् आविलं पूतिगन्धं च संवृत्तम्। तीर-तले च काकपेये पयसि बककुलम् व्याकुलम् मीनान्वेषणतत्परं बभ्राम। करुणालयो बोधिसत्वो मीनकुलम् अवेक्ष्य चिन्तामापेदे। 'कष्टम्! महत् कष्टम्!! इयम् आपत् आपतिता मीनानाम्। मानवायुरिव प्रतिदिनं क्षीणं क्षीणतरं च जायते जीवनं मीनजीवनञ्च। इत: पल्वलात्पलायनमपि न सरलं भक्षकेषु निरीक्षमाणेषु। प्राणान् अविगणय्य क एषां नेता भवेत्? मीनास्वादलोलुपा मीनद्वेषिण: तीरं परित: प्रत्यहं वर्धन्ते। किं तावदत्र प्राप्तकालं विधीयताम्?' इति करुणया दूयमान-हृदयो दीर्घमुष्णञ्च नि:श्वस्य आकाशं समीक्ष्य भावाभिभूतेन गद्गदस्वरेण मन्दं-मन्दं प्रार्थया-ञ्चक्रे—

स्मरामि न प्राणि-वधं यथाहं सञ्चिन्त्य कृच्छ्रे परमेऽपि कर्तुम्।
अनेन सत्येन सरांसि तोयैरापूरयन् वर्षतु देवराज:॥

अथ तस्य महात्मनस्तपोबलाद् सत्यपरिपालन-बलाद् वा परितः कालाः कालाः सलिलविपुला मेघमाला प्रादुरभवन् । सौदामिनी समन्ततः व्यद्युतत् । क्षणाय सर्वं शान्तमभूत् । ततो धारासारैः ववर्ष देवो महेन्द्रः । विद्रुताः भक्षकाः पक्षिगणाः । अमन्दमानन्दमविन्दत मीनकुलम् । वृष्टिनिवृत्तेराशङ्कया पुनः पुनरभाषत पर्जन्यं बोधिसत्वः

"वर्षतु वर्षतु वारि, पूर्णभवन्तु सरांसि ।
अवलोकमवलोकं, नृत्यन्तु हि नो मनांसि ॥"

तदाकर्ण्य देवेन्द्रोऽपि प्रीतः साक्षादभिगम्यैनम् आराधयन्नुवाच "मत्स्येन्द्र ! महामनाः ! तवैवायं सत्यातिशयस्य प्रभावः । ममैवानवधानतेयं यद् भवद्विधानां लोकोपकारपराणां व्यापारयोगं न भजामि । परमतः चिन्तां मा कृथाः । सतां कार्यानुष्ठानाय सदा उद्यतो भविष्यामि । देशोऽपि भवताधिष्ठितो दुःखापन्नो न भविष्यति ।"

एवं महेन्द्रोऽपि प्रियवाक्यैस्तमाराध्य अन्तर्दधे । तच्च सरः परां तोयसंमृद्धिम् अवाप ।

तदेवं शीलवतां कल्याणाः अभिप्रायाः इहैव समृद्ध्यन्ति । परत्र तु प्रागेव । अतः शीलविशुद्धौ प्रयतितव्यम् ।

शब्दकोशः

बोधिसत्त्वः=बुद्ध का नाम, (ज्ञानी आत्मा)
महासत्त्वः=महाबलशाली, हौसले वाला ।
पूतिगन्धं=दुर्गन्धयुक्त
ह्रूयमानम्=दुःखी होता हुआ
सौदामिनी=बिजली
विद्रुतः=भागा हुआ ।
राद्धान्त=सिद्धान्त, मन्तव्य,
प्रचिचारिषुः=प्रचार करने की इच्छा वाला :
पल्वलम्=जोहड़
प्राप्तकालं=यथा अवसर
कृच्छ्रम्=कठिनाई
धारासारैः=मूसलाधार

अभ्यासः

१ निम्नलिखित विग्रह वाक्यों के समस्तपद बनाओ और समास का नाम बताओ :—

(क) कमलैः विभूषितम्…………
(ख) नाना च ते जलचराः, तैः उपशोभितम्…………
(ग) तीरान्ते तरवः, तेषां कुसुमानि, तैः अवकीर्णम्…………
(घ) परेषां हितस्य साधनम्, तस्मिन्नेव तत्परः………
(ङ) महान् सत्त्वो यस्य सः…………
(च) मीनानाम् आस्वादः, तस्मिन् तस्य वा लोलुपः……… ..
(छ) महान् च असौ इन्द्रः…………

२ बोधिसत्त्व के जिस श्लोक को सुनकर इन्द्र ने वर्षा की उसका भाव स्पष्ट करो ।

३ निम्नाङ्कित प्रश्नों के उत्तर संस्कृत में दो :—

(क) मत्स्य-जन्मनि बोधिसत्त्वः कीदृशे सरसि अवसत्, मीनैः च सह कीदृशः तस्य व्यवहारः ?
(ख) कीदृशी चिन्ता मीनकुल-विषये बोधिसत्त्वस्य ?
(ग) बोधिसत्त्वस्य प्रार्थनया किम् अभूत् ?
(घ) इन्द्रः कां प्रतिज्ञाम् अकरोत् ?

४ इस पाठ के शब्दकोश में से अन्तिम पाँच शब्दों का वाक्यों में प्रयोग करो ।

द्वादशः पाठः

वैशम्पायन-शुकस्य आत्म-ग्लानिः

अस्ति पूर्वा-पर-जलनिधि-वेलालग्ना पवित्रा विन्ध्याटवी नाम। तस्यां च दण्डकारण्यान्तः-पाति विख्यातम् भगवतो महामुनेर् अगस्त्यस्य गोदावर्या परिगतम् आश्रमपदम्। तस्य च नातिदूरे पम्पाभिधानं पद्मसरः।

तस्य सरसः पश्चिमे तीरे शाखाबाहुभिर् उपगुह्य इव विन्ध्याटवीं स्थितो महाञ्जीर्णः शाल्मली। तत्र च शाखाग्रेषु, कोटरोदरेषु, स्कन्ध-सन्धिषु, जीर्ण-वल्कल-विवरेषु च महावकाशतया नानादेश-समागतानि शुक-शकुनि-कुलानि प्रतिवसन्ति स्म। ते च तस्मिन्नतिवाह्य निशाम् प्रतिदिनम् उत्थायोत्थाय आहारान्वेषणाय नभसि विचरन्ति स्म।

एकस्मिन् जीर्णकोटरे पश्चिमे वयसि वर्तमानस्य शुकस्य पितुरहं सूनुरभवम्। प्रसववेदनया जननी मे परलोकमगमत्। दुःखितोऽपि खलु तातः एकाकी मत्संवर्धनपरोऽभवत्। अतिवृद्धत्वात् परिभ्रमितुम् अशक्तः स परनीड-पतितान् तण्डुल-कणान् शुकमुख-निपतितानि फलशकलानि वा समाहृत्य मह्यमदात। प्रतिदिवसं च मदुपभुक्तशेषम् अकरोद् अशनम्।

एकदा तु प्रभाते तत्र मृगया-कोलाहल-ध्वनिर् उदचरत्। आकर्ण्य च तमहं भयविह्वलः समीपवर्त्तिनः पितुः जरा-शिथिल-पक्ष-पुटान्तरम् अविशम्। अनन्तरं च कोलाहलम् अवर्धत, पशु-पक्षिणां च सर्वेषां कलरवेण सर्वतः प्रचलितमिव तदरण्यम् अभवत्। किमिदमिति जिज्ञासमानः शीघ्रमेव शबर-सैन्यमेकम् अद्राक्षम्। किञ्चित्कालं तत्र विश्रम्य, जलादिकं च पीत्वा तत् सैन्यं शनैः शनैः अभिमतं दिगन्तरम् अयासीत्।

एकतमस्तु जरच्छबरः तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत। पुनस्तु सत्वरमेव पादपमारुह्य, प्रतीकारासमर्थान् शुक-शावकान् एकैकतया फलानि इव तस्य वनस्पतेः शाखान्तरेभ्यः गृहीत्वा, अपगतासूंश्च कृत्वा क्षितौ अपातयत्। तातस्तु माम् पक्ष-संपुटेन आच्छाद्य तस्थौ।

असावपि पापः शाखान्तरैः सञ्चरमाणः कोटरद्वारमागत्य उत्कूजन्तम् आकृष्य तातं गतासुमकरोत्। मां तु नालक्षत। उपरतं च तम् अवनितले अमुञ्चत्। अहमपि तेनैव सहापतम्। अवशिष्ट-पुण्यतया तु पुञ्जितस्य महतः शुष्क-पत्रराशेर् उपरि पतितमात्मानमपश्यम् अङ्गानि येन मे नाशीर्यन्त।

यावच्चासौ तस्मात्तरु-शिखरान्नावतरति तावदहं पितरमुत्सृज्य नृशंस इव नातिदूर-वर्त्तिनः तमालतरोः मूलदेशम् अविशम् अवतीर्य च स क्षिति-तलप्रकीर्णान् संहृत्य शुक-शिशून् अपगतः।

मां तु लब्ध-जीविताशं पितृ-मरण-शोक-शुष्क-हृदयं संत्रास-जाता बलवती पिपासा परवशम् अकरोत्। 'अधुना सुदूरम् अतिक्रान्तः स पापकृद्' इति विचार्य, भयचकितया दृशा दिशोऽवलोक्य, निष्क्रम्य तस्मात् तमालतरुमूलात् सलिल-समीपं सर्तुं प्रयत्नम् अकरवम्।

अजातपक्षतया मे चरणसञ्चारोऽस्थिरः। मुहुर्मुहुर् इतस्ततः पतन्तम् आत्मानं यथाकथंचित् संधारयन्, अनभ्यासेन पदमेकमपि दत्वा उन्मुखः स्थूल-स्थूलं श्वसन् धूलि-धूसरोऽहम् अभवम्। मम मनसि समभूत्—'अतिकष्टासु अवस्थासु अपि जीवित-निरपेक्षा न भवन्ति खलु जगति प्राणिनः। उपरतेऽपि ताते ऽहम् प्राणीमि। धिङ् माम् अकरुणम् अतिनिष्ठुरम् अकृतज्ञम् खलं हि खलु मे हृदयम्लोकान्तर-गतायाम् अम्बायां, नियम्य शोक-वेगम्, अविगणय्य स्व-वृद्धत्वं संवर्धन-क्लेशं च, यत्तातेन परिपालितस् तत् सर्वमेव मया एकपदे विस्मृतम्। अतिकृपणाः खल्वमी प्राणाः। ईदृगवस्थम् अपि माम् आयासयति जलाभिलाषः! खलो विधिर् अनिच्छतोऽपि मे मरणमथोपपादयेत्!'

शब्दकोशः

वेला=तट, किनारा, सीमा	पद्मसरः=कमलों का तालाब
उपगुह्य=लपेट कर (उप+गुह्+क्त्वा)	शाल्मली=सेंमल का वृक्ष, जिसकी रूई रेशम सी होती है,
स्कन्ध=ठूंठ, मुख्य हिस्सा	विवरः =छिद्र
शकुनिः=पक्षी	अतिवाह्य=बिताकर (अति+वह्+णि+ल्यप्)
सूनुः=पुत्र	
शकलम्=टुकड़ा	अशनम् =भोजन
शबरः=भील	क्षितिः =भूमि
स्थूल-स्थूलं=गहरे गहरे	प्राणीमि=सांस लेता हूं।

अभ्यासः

१ इन समासों के विशेष्य लिखो, साथ ही विग्रह भी :—

पूर्वापरजलनिधिवेलालग्ना।

दण्डकारण्यान्तःपाति।

पम्पाभिधानम्।

मत्संवर्धनपरः।

परनीडपतितान्।

अपगतासून्।

गतासुम्।

पितृ-मरणशोकशुष्कहृदयम्।

२ (क) इस सन्दर्भ में वर्णित तात का स्नेह और प्राणी के जीवन-मोह पर अपने शब्दों में भली-भान्ति प्रकाश डालो।

(ख) शुक की आत्मग्लानि का कारण स्पष्ट करो।

३ शिकार करने वाले के आने पर वनपक्षियों या वनचरों में कैसी हलचल होती है? अपने शब्दों में लिखो।

४ संस्कृत में उत्तर दो :

(क) शाल्मली-वृक्षस्य विशालता कथं द्योतिता ?

(ख) वृक्षस्य केषु भागेषु पक्षिणः वसन्ति स्म ?

(ग) मृतायां शुकस्य जनन्यां शुकस्य तातः किमनुभवन् अपि कस्मिन् कर्मणि तत्परोऽभवत् ?

(घ) स जरच्छवरः किम् दारुणम् कर्म अकरोत् ?

(ङ) मृते पितरि शुकः कं यत्नम् अकरोत् ?

५ नीचे लिखे सन्धियुक्त पदों का सन्धिच्छेद करो :—

बाहुभिरुपगुह्य । तस्मिन्नतिवाह्य । सूनुरभवम् । जरच्छवरः । क्षितावपातयत् । तातस्तु । तेनैव । सहापतम् । यावच्चासौ । मुहुर्मुहुरितस्ततः ।

त्रयोदशः पाठः

रंगभूमौ कर्ण-प्रवेशः

तत्र रङ्गभूमौ समाप्त-भूयिष्ठे तस्मिन् अस्त्र-प्रदर्शने, वादित्रे च निःस्वने, मन्दीभूते च समाजे द्वारदेशात् कर्णः विस्तीर्णं रंगं विवेश। सहजं कवचं बिभ्रत्, कुण्डलेन च द्योतिताननः सधनुः स महाबाहुः सर्वतो रङ्गमण्डलं निरीक्ष्य द्रोण-कृपयोः न अत्यादृतमिव प्रणामम् अकरोत्। स सर्वः समाजजनो निश्चलः स्थिर-लोचनः 'कोऽयम्' इति आगतक्षोभः कौतूहलपरो अभवत्।

तदा मेघ-गम्भीर-स्वरेण अज्ञात-भ्रातरम् अर्जुनं सोऽब्रवीत्—"पार्थ ! यत् कर्म त्वया कृतम् अहं ततोऽपि विशेषवत् नृणां पश्यतां करिष्ये। मात्मानं विस्मयं गमः।"

ततो द्रोणाभ्यनुज्ञातः महाबलः सदाप्रियरणः कर्णः पार्थेन यत्कृतं तच्चकार। तद् दृष्ट्वा दुर्योधनः कर्णं परिष्वज्य परया मुदा अब्रवीत्—"महाबाहो ! स्वागतं ते ! दिष्ट्या प्राप्तोऽसि। मम इदं कुरुराज्यं यथेष्टम् उपभुज्यताम्।"

कर्णः—"मन्येऽहं सर्वं साधितम् ! त्वया च सह सखित्वं वृणे। प्रभो ! पार्थेन द्वन्द्व-युद्धं कर्तुम् इच्छामि।"

ततः पार्थः आत्मानं क्षिप्तमिव मत्वा धार्तराष्ट्राणां मध्ये स्थितम् अचलम् इव कर्णम् अभ्यभाषत—"त्वं रे कर्ण ! मया हतः अनपेक्षितान् लोकान् प्रतिपत्स्यसे।"

कर्णः—"भारत ! दुर्बलैर् वचनैः किम् ? शरैः कथय। यावत् ते शिरः शरैः गुरोः समक्षम् अपहरामि।'

ततो द्रोणाभ्यनुज्ञातः पार्थः भ्रातृभिस् त्वरया आश्लिष्टः रणाय तम् उपजगाम। दुर्योधनेनापि सशरं धनुः प्रगृह्य स्थितः समरोद्यतः कर्णः परिष्वक्तः। पुनर् अपि रङ्गः द्विधा समभवत्। स्त्रीणाम् अपि द्वैधम् अजायत।

विज्ञातार्था कुन्ती मोहं जगाम। सर्वधर्मविद् विदुरः तां प्रेष्याभिर् आनीतैश् चन्दनोदकैर् आश्वासयामास।

द्वन्द्व-युद्ध-समाचारे कुशलः कृपाचार्यः तौ उद्यत-महा-चापौ अब्रवीत् —"अयं पृथायास् तनयः कनीयान् पाण्डु-नन्दनो भवता सार्धं द्वन्द्व-युद्धं करिष्यति। महाबाहो! त्वम् अपि एवं मातरं, पितरं, कुलं कथयस्व येषां नरेन्द्राणां त्वं कुलभूषणः। ततः पार्थः तां विदित्वा प्रतियोत्स्यति वा न वा। नृपात्मजाः अकुलीनैः सह न युध्यन्ते।"

एवम् उक्तस्य कर्णस्य व्रीडावनतम् आननं वर्षाम्बु-विक्लिन्नं पद्ममिव बभूव। दुर्योधनः सत्वरम् उवाच—"आचार्य! यदि अयम् अर्जुनः युद्धे अराज्ञा योद्धुं नेच्छति तर्हि अयं कर्णो अङ्गराज्ये मया अभिषिच्यते।"

ततः तस्मिनेव क्षणे मन्त्रविद्भिः काञ्चने पीठे सलाज-कुसुमैः काञ्चनैः घटैः महारथः कर्णः अभिषिक्तः।

कर्णः—"अस्य राज्य-प्रदानस्य सदृशं किं ते ददामि?"

सुयोधनः—"अत्यन्तं सख्यं ते इच्छामि।"

कर्णः—"तथा स्यात्।" हर्षात् च उभौ समाश्लिष्य परां मुदम् अवापतुः।

तदैव अधिरथो नाम सूतः रङ्गं विवेश। तमालोक्य कर्णः धनुः त्यक्त्वा शिरसा समवन्दत। रथ-सारथिश्च ससंभ्रमः सस्नेहं 'प्रिय! पुत्रक!' इति कथयन् परिष्वज्य अभिषेकार्द्रं तस्य मूर्धानम् अश्रुभिः पुनरपि अभिषिक्तवान्।

तदा 'सूतपुत्रोऽयम्, इति सञ्चिन्त्य पाण्डवो भीमसेनः प्रहसन्निव अब्रवीत्—'सूतपुत्र ! त्वं रणे पार्थेन वधं नार्हसि। त्वया स्वकुलस्य सदृशः प्रतोदः तूर्णं गृह्यताम्। नराधम ! त्वम् अङ्गराज्यम् अपि उपभोक्तुं नार्हः।"

एवमुक्तः कर्णः किञ्चित् प्रस्फुरिताधरः विनिःश्वस्य गगनस्थं दिवाकरम् उदैक्षत।

ततो दुर्योधनः कोपाद् अब्रवीत्—"वृकोदर ! ईदृशं वचनं वक्तुं ते न युक्तम्। यतोहि—

'क्षत्रियाणां बलं ज्येष्ठं, योद्धव्यं क्षत्र-बन्धुना।
शूराणां च नदीनां च दुर्विदाः प्रभवाः किल॥'

भवतां च यथा जन्म तदपि मया आगमितम्ः। सकुण्डलो, सकवचो, सर्वलक्षण-लक्षितो अयम् आदित्य-सदृशो नरेश्वरः सर्वमपि पृथ्वीराज्यमर्हः, किं पुनर् अङ्गराज्यम् ?"

ततः सर्वस्य रङ्गस्य महान् हाहाकारोऽभूत्। शनैः शनैः शान्ते च कलकले सूर्योऽपि अस्तमुपागमत्

नृपो दुर्योधनः अग्रकरे कर्णम् आलम्ब्य तस्मात् रङ्गात् विनिर्ययौ। सर्वे च स्वं स्वं निवेशनं प्रस्थिताः। तदा कश्चित् जनः 'अर्जुन' इति, कश्चित् 'कर्ण' इति, कश्चित्—'दुर्योधन' इति एवं ब्रुवन् प्राचलत्।

कर्णमासाद्य दुर्योधनस्य अपि अर्जुनसंजातं भयं क्षिप्रम् अन्तरधीयत। युधिष्ठिरस्य अपि तदा मतिर् अभवत् क्षितौ कर्णतुल्यो धनुर्धरो नास्ति' इति।

शब्दकोशः

वादित्रं	=वाद्य का साजोसामान	निःस्वनः	=शब्दरहित
		प्रेष्या	=दासी
परिष्वज्, आश्लिष्	=आलिंगन करना	आश्वास्	=चेतना लाना
		प्रतोदः	=अंकुश चाबुक
तूर्णम्, क्षिप्रम्	=शीघ्र	कार्मुकम्	=धनुष
निवेशनम्	=घर।		

अभ्यासः

१ निम्नलिखित विग्रह-वाक्यों के समस्तपद पाठ में आये हैं, उन्हें लिखो, समास का नाम भी लिखो—

(क) समाप्तं भूयिष्ठं यस्य, तस्मिन् ···, समास बहुव्रीहि
(ख) निर्गतः स्वनः यस्मात् तस्मिन् ···, ···
(ग) द्योतितम् आननं यस्य सः ···, ···
(घ) द्रोणश्च कृपश्च, तयोः ···, ···
(ङ) आगतो क्षोभो यस्य सः ···, ···
(च) मेघ इव गम्भीरं स्वरं, तेन ···, ···
(छ) समराय उद्यतः ···, ···
(ज) द्वन्द्वं च तद् युद्धं, तस्य समाचरः, तस्मिन् ···, ···
(झ) वृकस्य उदरम् इव उदरं यस्य सः..., ···
(ञ) कवचेन सहितः ··· ···, ···

२ इस पाठ की कथा संक्षेप में लिखो।

३ निम्नांकित प्रश्नों के उत्तर संस्कृत में दो :—

(क) कर्णः कदा रङ्गभूमिं विवेश ?
(ख) कर्णः किम् अकरोत् किं च कर्तुम् ऐच्छत् ?
(ग) दुर्योधनः कर्णस्य स्वागतं किमर्थम् अकरोत् ?
(घ) कुन्ती मोहं किमर्थं जगाम ?
(ङ) कर्णः अधिरथं सूतं किमर्थं शिरसा नमश्चकार ?
(च) रङ्गः कदा द्विधा अभवत् ?

४ इस वर्णन के आधार पर कर्ण का चरित्र-चित्रण करो।

चतुर्दशः पाठः

पत्र-लेखनम्

मुख्यतः द्विविधानि पत्राणि भवन्ति-वैयक्तिकानि, व्यावसायिकानि वा । स्व-सम्बन्धिभ्यः इष्ट-मित्रेभ्यो वा लिखितानि पत्राणि वैयक्तिकानि उच्यन्ते । लौकिकाय व्यवहाराय कार्यालयाधिकारिभ्यः, आचार्यादिभ्यो वा प्रेषितानि पत्राणि व्यावसायिकानि स्युः ।

पत्रेषु एतेषां नव-अङ्गानां विशिष्टं ध्यानं करणीयम् :—
१. स्वनाम-धाम, २. पत्र-प्राप्तुर् नामधाम, ३. तिथिः, ४. सम्बोधनम्, ५. पत्र प्रारम्भः, ६. पत्र-शरीरम्, ७. पत्र-परिसमाप्तिः, ८. सम्बन्ध-ज्ञापनम्, ९. हस्ताक्षराणि ।

वैयक्तिकेषु पत्रेषु अधोलिखितः क्रमोऽनुकरणीयः—

स्व-नाम-धाम
....

तिथिः....................

सम्बोधनम्······! (साभिवादनम्)

पत्र-प्रारम्भः—(वार्तालापस्य आरम्भ इव औपचारिकता-विहीनः)

पत्र-शरीरम्—·········

पत्र-परिसमाप्तौ कुशल-क्षेम-प्रश्नाः, इष्ट-मित्र-सम्बन्धिनां च संस्मरणम् ।

सम्बन्ध ज्ञापने नैकट्यस्य द्योतकाः स्नेहं-विनयं-श्रद्धां वा प्रकाशमाणाः शब्दाः ।

······हस्ताक्षराणि (संक्षिप्तानि)

पत्र-प्राप्तुर् नाम-धाम
....

व्यावसायिकेषु पत्रेषु निम्नांकितः प्रकारः—

पत्र-प्राप्तुर् नाम-धाम

....

सम्बोधनम् ! (अभिवादनं नापेक्ष्यते)

विषयः ...... (पत्र-प्रारम्भे संक्षेपेण पत्रस्य विषयोल्लेखः प्रायेण)

पत्र-शररम् ......

....

....

पत्र-परिसमाप्तौ धन्यवादः आभार-स्वीकृतिर् वा ।

तिथिः.........

सम्वन्धज्ञापनम्, न तु सामीप्य-प्रदर्शनं, विश्वसनीयता-ज्ञापनमेव केवलम् ।

स्वनाम-धाम

....

......हस्ताक्षराणि (सम्पूर्णानि)

पत्र-प्राप्तुर् सम्बन्धानुसारं सम्बोधनम् सम्बन्ध-ज्ञापनं च करणीयम् । पत्रारम्भः, पत्र-शरीरं, परिसमाप्तिश्च पत्रस्य विषयानुसारं परिवर्त्तनीयानि । स्वकीयः पत्रप्राप्तुश्च नाम-धाम, तिथिः, हस्ताक्षराणि च यथा-परिस्थिति लिख्यन्ते ।

उदाहरणाय द्वे पत्रे अत्र उद्ध्रियेते ।

मित्राय पत्रम् —

३ नव-दिल्लीतः

तिथिः—जुलाई २०, १९६८.

प्रियवर सुधीन्द्र !

रोहतकात् प्रेषित पत्रं ते अधिगतम् । त्वमधुना दिल्ली-नगरे एव स्थितः स्याद् इति विचारयामि । तव पत्रानुसारं स्वस्थ एव भवान् प्रतिभति । परमद्यावधिस् त्वम् अस्मद्-दर्शनाय अत्र नैवागत इति दुःखाकरोति माम् ।

मन्ये, यत् तव गृहाद् अस्माकं गृहं योजन-द्वयेन दूरीकृतम्, दिल्यां च सर्वयानानां दुरवस्था वर्धतेतराम्। परं मित्र! मित्राय कष्टं सहनीयमेव । जानासि एव यदहम् विशिष्ट-कार्यभारेण त्वां द्रष्टुम् तत्रागमने न समर्थः। अतः पत्रमवलोक्य श्वः एव सायंकालपर्यन्तं स्वदर्शनैः माम् अस्मान् च सर्वान् एव तर्पयिष्यसीति ।

एकाकी त्वमत्र, परिवाराद् दूरतः तिष्ठसि । परं सन्ति मित्राणि यानि कानिचित् तव पाठशालायां तानि तव सान्त्वनायै अलम् ! तेभ्यः अभिनन्दनम् मे !

त्वां सस्नेहं स्मरन्
तव आलोकः

प्राप्ता—श्री सुधीन्द्र कुमारः,
दिल्ली–७

प्रार्थनापत्रम्—

प्राप्ता—

प्रधानाचार्यमहोदयः,
राजकीय-उच्चतर-मध्यमिको विद्यालयः,
जयपुर ।

श्रीमान् !

विषयः—ग्रीष्मावकाशे देशाटनं, व्यय-सूचना

श्रीमताम् अनुमत्या छात्राणां दलमेकं भारत-भ्रमणाय गतमासीत् । तस्य व्यय-निरीक्षणे अहम् नियोजितः । पूर्णतः उचिते व्यये शुद्धे व्यय-लेखने च अहम् यथाशक्ति अयते ।

भवता व्यय-सीमा शतोत्तर-सहस्र-रूप्यकाणां निर्धारिता आसीत् । मया तु निखिलोऽपि व्ययः चतुर्दशोत्तर-सहस्ररूप्यकैर् एव साधितः अवशिष्टं रूप्यकाणां षडशीतिः विद्यालयस्य कार्यालये प्रदत्तम् । तस्य प्राप्ति-प्रमाण-पत्रं, व्ययस्य च आलेखः पत्रेण सह सम्बद्धे स्तः । भवता एतत् निरीक्ष्येत इति प्रार्थना ।

प्रार्थये च अस्य कार्य-भारस्य सम्यग् वहनाय प्रमाण-पत्रमेकं मह्यं दत्वा अनुकम्पतां भवान् ।

सधन्यवादम् ।

तिथिः—जुलाई २०, १९६८ भवन्निष्ठः

धाम—१११ विस्तृत-मार्गः, रामगोपालो राठौरः

जयपुरम् । (क्रमाङ्कः १६, कक्षा-१०)

शब्दकोशः

नाम-धाम =नाम और पता

नैकट्यम् =सामीप्य

उध्द्रियन्ते =उदाहरण रूप दिये जाते हैं ।

दुःखाकरोति =दुःखी करता है

वर्धतेतराम् =दिन-ब-दिन बढ़ रही है

भवन्निष्ठः =आपका विश्वास पात्र ।

औपचारिकता=तकल्लुफ, रस्मी व्यवहार

अधिगतम् =प्राप्त हुआ

प्रतिभाति =लगता है

योजनम् =चार कोस, ६ मील

तर्पयिष्यसि =तृप्त करोगे

प्राप्ति-प्रमाण-पत्रम् =रसीद

अभ्यासः

१ अपने पिता जी को पत्र लिखो जिसमें विद्यालय के छात्र-दल के साथ देशाटन पर जाने के लिए व्यय की अनुमति मांगो ।

२ एक पत्र सम्पादक के नाम लिखो जिसमें अपने विद्यालय के 'उपाधि-वितरण'-उत्सव की संक्षिप्त सूचना दो । ध्यान है न इस पुस्तक में भी एक पाठ है, जिससे थोड़ी बहुत सहायता ले सकते हो ।

पञ्चदशः पाठः

यद्भविष्यो विनश्यति

कस्मिंश्चित् जलाशये ऽनागतविधाता, प्रत्युत्पन्नमतिः, यद्भविष्यश्चेति त्रयो मत्स्याः अवसन् । अथ कदाचित् तं जलाशयं दृष्ट्वा गच्छद्भि-र्मत्स्यजीविभिर्मन्त्रितम् "अहो बहु-मत्स्योऽयं ह्रदः । कदाचिदपि अस्माभिर्न आलोड्यत । तदद्य तावदाहारवृत्तिः सञ्जाता । सन्ध्या-समयः संवृत्तः । ततः प्रभातेऽत्र आगन्तव्यम् इति निश्चयः ।"

ततस्तेषां तद् व्रजोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यानाहूय इदमूचे–"अहो ! श्रुतं भवद्भिर् यत् मत्स्यजीविभिरभिहितम् तद् रात्रावेव गम्यतां किञ्चिन्निकटं सरः । प्रभातसमये मत्स्य-जीविनो नूनमत्र समागम्य मत्स्य-संक्षयं करिष्यन्ति । एतन्मम: मनस वर्तते । तन् न युक्तं साम्प्रतं क्षणमप्यत्रावस्थातुम् ।"

तद् आकर्ण्य प्रत्युत्पन्नमतिः प्राह—"अहो ! सत्यम् अभिहितं भवता मम अपीष्टमेतत् । अन्यत्र गम्यताम् ।"

अथ तत्समाकर्ण्य यद्भविष्यः प्रोच्चैर्विहस्य प्रोवाच —"अहो न भवद्भ्यां मन्त्रितं सम्यगेतदिति । किं वाङ्मात्रेण तेषां पितृपैतामह-मेतत् सरस् त्यक्तुं युज्यते । यदि आयुः क्षयोऽस्ति तद् अन्यत्र गतानाम् अपि मृत्युर्भविष्यत्येव । उक्तं चः—

'अरक्षितं तिष्ठति दैवरक्षितम् ।
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथो ऽपि वने विसर्जितः ।
कृतप्रयत्नो ऽपि गृहे विनश्यति ॥'

तद् अहं न यास्यामि । भवद्भ्यां च यत्प्रतिभाति तत् कर्त्तव्यम् ।" अथ तस्य तं निश्चयं ज्ञात्वाऽनागत विधाता प्रत्युत्पन्न मतिः च निष्क्रान्तौ सपरिजनेन ।

अथ प्रभाते तैः मत्स्यजीविभिः जालैस् तज्जलाशयमालोड्य यद्भविष्येण सह तत्सरो निर्मत्स्यतां नीतम् ।

तथा हि उक्तम् अपि—

अनागत-विधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥

शब्दकोशः

अनागतविधाता	=भविष्य के लिए जुटाने वाला	प्रत्युत्पन्नमतिः	=तात्कालिक सूझबूझ वाला
यद्भविष्यः	='जो होगा ठीक होगा' ऐसा मानने वाला	आलोड्यत	=विलोडित किया गया, मथा गया, जालों से छाना गया ।

अभ्यासः

१ निम्न पदों में सन्धि-विच्छेद करके सन्धि का नाम बताओ :—

समस्त पद	सन्धि-विच्छेद	सन्धि-नाम
कस्मिंश्चित्	कस्मिन्+चित्	व्यञ्जन-सन्धि
यद्भविष्यश्चेति	...	...
गच्छद्भिर्मत्स्यजीविभिर्मन्त्रितम्	...	...
बहुमत्स्योऽयम्	...	...
कदाचिदपि	...	...
अस्माभिर्न	...	...
तदद्य	...	...
प्रभातेऽत्र	...	...

ततस्तेषाम्	...	...
मत्स्यजीविभिरभिहितम्	...	...
क्षणमप्यत्रावस्थातुम्	...	...
तदाकर्ण्य	...	...
ममापीष्टम्	...	...
प्रोच्चैर्विहस्य	...	...
सम्यगेतदिति	...	...
आयुःक्षयोऽस्ति	...	...
मृत्युर्भविष्यत्येव	...	...
जीवत्यनाथोऽपि	...	...
द्वावेतौ	...	...

२　नीचे लिखे रेखाङ्कित समस्त पदों का विग्रह करके पूरे अनुच्छेद को फिर से लिखो :—

मत्स्यजीविभिर्मन्त्रितम्—"अहो ! बहुमत्स्योऽयं ह्रदः। तदद्य तावद् आहार-वृत्तिः सञ्जाता । सन्ध्यासमयः संवृत्तः, प्रभात-काले अत्रागन्तव्यम् ।" अनागत-विधाता ऊचे —'सूर्योदये मत्स्य-जीविनः नूनमत्र समागत्य मत्स्य-संक्षयं करिष्यन्ति ।' प्रत्युत्पन्नमतिः समर्थनम् अकरोत् । यद्भविष्यो विहस्य प्राह— 'दैवरक्षितं तिष्ठति, दैवहतं विनश्यति, अनाथोऽपि जीवति, कृतप्रयत्नो ऽपि विनश्यति ।'

३　इस पाठ में निम्न शब्द कृदन्त हैं :—

दृष्ट्वा, गच्छद्भिः. मन्त्रितम्, सञ्जाता, संवृत्तः, समाकर्ण्य, आहूय, श्रुतं, अभिहितम्, समागम्य, अवस्थातुम्, आकर्ण्य, इष्टम्, विहस्य, त्यक्तुम्, गतानाम्, उक्तं, रक्षितम्, हतम्, विसर्जितः, कृतः, ज्ञात्वा, निष्क्रान्तौ, आलोड्य, नीतम् ।

इनमें के एकैकशः बताओ कि वह शब्द-विशेष अव्यय है या नहीं ? नहीं तो, विभक्ति, वचन क्या है ? किस प्रकार के अर्थ को देने वाला है ? प्रत्यय, धातु और कौन-कौन से हैं ? उदाहरणार्थ :—

दृष्ट्वा—अव्यय, पूर्वकालिक कृदन्त, दृश् + क्त्वा ।
गच्छद्भिः—तृतीया बहुवचन, वर्तमानकीलिक कृदन्त, गम् + शतृ ।

४ किसी तालाब में तीन मछलियां रहती थी । एक दिन मछेरों ने उस तालाब में बहुत सी मछलियां देखीं । इसलिए उन्होंने दूसरे दिन उस तालाब को जाल से छानने की सोची ।

उन का यह विचार एक मछलीने सुन लिया । उसने सब मछलियों को बुलाकर पास वाले तालाब में चलने के लिए कहा । एक मछली को छोड़कर और सब मछलियां दूसरे तालाब में चली गईं । मछेरों ने उस एक मछली को ही पकड़ लिया ।

षोडशः पाठः

महाचतुरः शृगालः

कस्मिश्चित् वनोद्देशे प्रसाधितकार्यो महाचतुरको नाम शृगालः आसीत् । एकदा बुभुक्षितः सः भोज्यम् मार्गयितुमितस्ततोऽभ्रमत् । यावत् अन्वेषणपरो भवति तावद् वनान्तरे स्वयं मृतम् धूसर-देहं गजमध्यगच्छत् । क्षुधा-क्षीणोदरो गजम् परितोऽवलोकयत् परम् तस्य कठिनम् चर्म विदारयितुं न प्राभवत् । अत्रान्तरे इतश्चेतश्च विचरन् दीर्घकेसरः कश्चित्सिंहस्तत्र समागच्छत् । सिंहमवलोक्य भूतलन्यस्तमस्तकः सविनयम् अवदत् भगवन् ! अहम् भवतः रक्षा-पुरुषः अद्य भवते गजमेनम् रक्षामि तत् स्वदताम् भवान् । योजितकरयुगलं तम् शृगालमवलोक्य सिंहोऽकथयत् भद्र ! सिंहोऽहम् बुभुक्षितोऽपि तृणम् न चरामि । परम् स्वयम् हतम् मृगमेव । अन्येन मारितः अभोज्योऽयम् मम गजः । तत्त्वमेव भक्षय । इत्युक्त्वा गते तस्मिन् सिंहे शृगालः परमानन्दमन्वभवत् ।

कालान्तरे कश्चिद् करालदंष्ट्रो व्याघ्रः दैवात् तत्र समागच्छत् । शृगालश्चाचिन्तयत् — एकस्तावत् दुरात्मा प्रणिपातेन अपवाहितः तत्कथमेनमपवाहयिष्यामि—स्वभावेन शूरोऽयम् न भेदं विना साध्यो भविष्यति— इति विचार्य गर्वादुन्नतकन्धरः तस्य पुरतो गत्वाऽवदत्—मातुल ! कथम् मृत्युमुखे प्रविष्टोऽसि । इदनीमेव दुष्टस्वभावो मृगेन्द्रो गजमेनम् व्यापाद्य नद्यां स्नातुं गतोऽस्ति माम् च अकथत् यदि कश्चिद् व्याघ्रः इहागच्छति तत्त्वम् सुगुप्तम् मामावेदय येन निर्व्याघ्रम् वनमिदम् विधास्यामि यतोहि कुपितोऽस्मि तान् प्रति अकथनीयेन कारणेन । तदाकर्ण्य त्रस्तचित्तो व्याघ्रो अवदत् भो चिरञ्जीविन् भागिनेय ! यच्छ मे प्राणदानम् चिरमायातस्यापि सिंहस्य नावेदनीया मदीया काऽपि आगमनवार्ता इत्युक्त्वा अपलायत ।

तस्मिन् गते कश्चिद् वृकः समागच्छत् । तमवलोक्य व्यचिन्तयत् शृगालः, अहो दृढदंष्ट्रोऽयम् वृकः तदस्य सकाशात् चर्मच्छेदम् कारयिष्यामि । एवम् निश्चित्य तमभ्यवदत्, 'अये भागिनेय ! चिराद् दृष्टयोऽसि बुभुक्षितमिव पश्यामि त्वाम्, सत्यञ्चेदतिथिरस्ति मे भवान्; अहञ्चास्य सिंहेन हतस्य गजस्य रक्षापुरुषः । व्यापादितगजो गतोऽस्ति सिंहो नद्यां स्नातुम् । आगमनकालम् यावत् विश्रब्धमास्वादय गजमांसम् ।' वृकोऽवदत्—'माम ! यदि गजेनानेन सिंहस्य सम्बन्धः तर्हि न युक्तं खादितुम् । क्षुधा एव शोभना यतो हि जीवन्नरो भद्रशतानि पश्येत् ।— शृगालो अवदत्, 'अयि अलस ! आगमनम् ते निवेदयिष्यामि तस्य, मा भयमधिगच्छ । तेन प्रतारितः तीक्ष्णदन्तो वृको यावद् गजचर्म भिनत्ति तावच् चञ्चलः शृगालः अकथयत् अये समागतः सिंहः व्रजत, शीघ्रतया वृकोऽपि भयमापन्नः सत्वरः प्रणष्टः ।

तदनन्तरं शृगालः एकः समागतः । तञ्च स महाचतुरकः भर्त्सयन्नत्यवाहत् । स्वयञ्च सुखेन चिरकालम् गज मांसम् अभक्षयत्, इयम् हि महाचतुरकस्य नीतिः —

नीचमल्प-प्रदानेन समशक्ति पराक्रमैः ।
उत्तमं प्रणिपातेन शूरं भेदेन योजयेत् ॥

शब्दकोशः

वनोद्देशे =जंगल का भाग । मार्गयितुम् =खोजने के लिए
विदारयितुं =फाड़ने के लिए । अपवाहितः =दूर कर दिया
व्यापादितः =मारा हुआ ।

अभ्यासः

१ 'प्रसाधित-कार्यः' का अर्थ है=कार्य बनाने वाला । जहाँ दो या अधिक पद मिल कर एक समस्त पद बनायें, और वह पद समास में आये पदों का अर्थ न कह कर किसी अन्य अर्थ को कहे वह बहुव्रीहि समास होता है । यहां 'प्रसाधितकार्य' पद प्रसाधित=

सिद्ध किया हुआ, कार्य=काम, इन दोनों से अन्य, भिन्न किसी व्यक्ति को कह रहा है जो कार्य बनाने वाला है। संस्कृत में इस का विग्रह इस प्रकार होगा—

प्रसाधितं कार्यं येन —सः—प्रसाधितकार्यः। इस प्रकार जहाँ अन्य व्यक्ति वाच्य है, वे निम्न पद पाठ में आये हैं। उन के अर्थ लिखो —

धूसर-देहम् = ...
क्षुधा-क्षीणोदरः= ...
दीर्घ-केसरः= ...
योजित-कर-युगलः= ...
करालदंष्ट्रः= ...
उन्नत-कन्धरः= ...
दुष्ट-स्वभावः= ...
त्रस्तचित्तः= ...
दृढ़दंष्ट्रः= ...
व्यापादितगजः= ...
तीक्ष्णदन्तः= ...
समशक्तिम्= ...

२ नीचे दिये विग्रहों के समास बनाओ— यह सब बहुव्रीहि हैं—

बहवः व्रीहयः यस्मिन् सः ...
पीतम् अम्बरं यस्य सः ...
श्वेतम् वस्त्रं यस्य सः ...
विकरालं मुखं यस्य सः ...
दीर्घाः केशाः यस्य सः ...
लम्बः उदरो यस्य सः ...
दीर्घा नासिका यस्य सः ...
दीर्घे नेत्रे यस्य सः ...
विशाले नेत्रे यस्या सा ...

अपहृताः केशाः यया सः ...
उपहृता दक्षिणा यस्मै सः ...
दत्तः शुल्को येन सः ...
अपहृतं धनं यस्मात् सः ...
वीराः पुरुषाः यस्मिन् सः ...

३ उपपद समास का अर्थ भी 'वाला' से किया जा सकता है, उपपद 'तत्पुरुष' होता है, उपपद का विग्रह 'तिङन्त' से होता है। जैसे :—

उपपद समास

कुम्भकारः =कुम्भं करोति इति कुम्भकारः=घड़ा बनाने वाला कुम्हार।

स्वर्णकार.=स्वर्णं करोति इति स्वर्णकारः=सोने का कुछ बनाने वाला सुनार।

लोहकारः=लोहं करोति इति लोहकारः=लोहे का कुछ बनाने वाला लुहार।

चर्मकारः=चर्म करोति इति चर्म-कारः=चमड़े का कुछ बनाने वाला चमार।

मन्त्रकारः=मन्त्रं करोति इति मन्त्रकारः=मन्त्र का अर्थ आदि करने वाला।

इन समस्तपदों का वाक्यों में प्रयोग करो।

४ संस्कृत में अनुवाद करो :—

राष्ट्रपति जाकिरहुसैन रूस से लौटते (आते) हुए काबुल गए। वहाँ वे अब्दुल गफ्फार खाँ साहब से मिले। दिल्ली पहुँचने पर प्रधान मन्त्री श्रीमति इन्दिरागाँधी और उपराष्ट्रपति श्री वी. वी. गिरि ने उनका स्वागत किया। आते हुए राष्ट्रपति को लोगों ने फूल मालाएँ भेंट कीं। दिल्ली विश्वविद्यालय में राष्ट्रपति को ही कुलपति का पद मिलता है।

५. इन उत्तरों के प्रश्न क्या हो सकते हैं, विचार कर लिखो :—
(क) सिंहं वीक्ष्य शृगालः भूतले मस्तकम् अधरत् ।
(ख) भगवन् अहं श्रीमतां रक्षा-पुरुषः ।
(ग) सिंहो बुभुक्षितोऽपि घासं न चरति ।
(घ) अस्य गजस्य सिंहेन सह सम्बन्धः ।
(ङ) गजस्य चर्म तीक्ष्णैः दन्तैः व्यदारयत् ।

६ इस कथा में जिन चार उपायों का तरीका और अवसर बताया गया है उनका प्रसंग बताते हुए निश्चय करो ।

३ नीचे दिये हुए शब्द तीन वर्गों में बांटे जा सकते हैं— 'वन', 'शरीर', 'खाद्य' । इनका वर्गीकरण करो :—

लवणः, पादः, सिंहः, शर्करा, मुखम्, शृगालः, नवनीतम्, गजः, मांसम्, नदीतीरम्, जानुः, हस्तौ, रोटिका, वृकः, आम्राणि, व्याघ्रः, वृक्षः, नारंगः लता, दन्ताः, चर्म, क्षीरम्, पयः, दंष्ट्रा, सिंहः, मस्तकम्, क्षुधा,

४ नीचे लिखे वाक्यों का काल-परिवर्तन निर्देशानुसार करो :—
महाचतुरकः नाम शृगालः वने प्रतिवसति । (भूतकाल)
सः भोजनाय इतस्ततः अभ्रमत् । (वर्तमानकाल)
गजं सः परितः अवालोकयत् । (भविष्यत्काल)
भूतले मस्तकम् अधरत् । (भविष्यत्काल)
शृगालः परमम् आनन्दम् अविन्दत । (वर्तमानकाल)
कथम् एनम् अपवाहयिष्यामि । (भूतकाल)
मातुल ! कथम् मृत्योः मुखे प्रविशसि । (भूतकाल)
वनं च निर्व्याघ्रं विदधामि । (भविष्यत्काल)

सप्तदशः पाठः

भारतीयं गौरवम्

भारतवर्षः प्राचीनतमो देशः। अस्य विज्ञानम् प्राचीनतमम्। मानव-सृष्टिरपि अत्रैव त्रिविष्टपे ऽभूत् इति भारतीयानां विश्वासः। संसारस्य पुस्तकालये ऋग्वेद एव सर्वप्रथमो ग्रन्थः, सोऽपि भारतीय एव। सर्वप्रथमः चक्रवर्ती सम्राट् मनुरेव निखिलामिमां भूमिम् अशासत। सांसारिकेभ्यः जनेभ्यः तस्य आज्ञा आसीत्—

एतद्देश-प्रसूतस्य, सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

विदेशेभ्यः जनाः आगत्य भारते आचारशिक्षां पठन्तु आचरन्तु च। अद्यापि भारतम् पञ्चशील-शिक्षाम् संसाराय यच्छति इति भारतीयम् गौरवम्।

पुरा भगीरथो महाराजः महता परिश्रमेण हिमालय-शिखरेषु अवरुद्धम् जलम् पर्वतान् भित्वा भूतले आनयत्। भारत-भूमिं च उर्वराम् अकरोत्। गंगाजलेन समानं मधुरं पावनं च जलं त्रिलोक्यामपि नास्ति। न तत् कदापि पूतिगन्धं भवति। विकुरुते वा।

पुरा किल नल-नीलौ भारतात् लङ्कां गन्तुं रामेश्वरं-सेतुम् अरचयताम्। समुद्रे सेतु-बन्धनं पुरा न केनापि कदापि श्रुतं कारितं वा। पाषाणं हि तत् छिद्रमयम्, जले न निमज्जति, अद्यापि तत्रैव उपलभ्यते।

महाभारत-काले पाण्डवाः यदा अज्ञातम् अवसन्, तस्मिन् समये महान्ति आश्चर्याणि अकुर्वन्। मुम्बापुर्याः समीपे समुद्रे द्वीपाभ्यन्तरे हस्तिगुहा। तत्र एकेनैव पाषाणखण्डेन तैः रचितं च विचित्रं विशालम्

मन्दिरम्। यस्य दर्शनाय अपेक्षन्ते चतुष्पञ्च होराः। विशालं पर्वतं तक्षणीभिः तक्षं तक्षम् अपूर्वम् इदम् मन्दिरम् रचितम्। अवलोकयतां मतिर्मुह्यति तत्र।

दिल्ली-नगरस्य समीपे अरावली नाम्नि पर्वतमालायां महाराजः पृथ्वीराजः स्वदुहितरे बेलायै यमुनास्तम्भमरचयत्। संसारस्य अष्टमम् आश्चर्यम् इदम्। अस्मिन् यमुना-स्तम्भे पञ्च खण्डाः। आरोहणाय चास्य मध्ये चक्राकारा सोपानपंक्तिः, मध्ये-मध्ये च वातायनानि। प्रतिखण्डं च परितः प्रघणयुक्तः विरामदः। भित्तिकायां च द्वारं येन विरामदे प्रविश्य परितः भ्रमितुं शक्यते। अधस्तात् स्थूलोऽयं स्तम्भः उपरि उपरि क्रमशः संकुचितो भवति। उत्तराभिमुखं द्वारं, भित्तिमध्ये च पाषाणेषु देवमूर्तयः उत्कीर्णाः दृश्यन्ते।

अस्य समीपे विशालं लोहकीलकम् आधुनिकानामपि वैज्ञानिकानां बुद्धेः भ्रमं जनयति। वर्षासु भूकम्पेषु वात्यासु वा न कदापि विकृतिं गच्छति। कथमेतत् कीलकम् उत्थापितम्, कथं कियद् वा भूमौ निखातम् कस्मिन् वा यन्त्रे कतमान् वा धातून् संमिश्र्य रचितमिति सर्वम् आश्चर्यमयम् वृत्तम्।

गुर्जर-देशे सोमनाथमन्दिरमपि मध्यकालीनं भारतस्य गौरवम् उपस्थापयति। हिन्दु–शासन-समयेऽस्य अलौकिकं वैभवम् आसीत्। महामूल्य–माणिक्य-मुक्ताफलादिभिः जटितानि अस्य तोरण-द्वाराणि कपाटानि च। अस्य स्तम्भाः, भित्तयः, छदिः च रत्नैः खचिताः आसन्। शतद्वयमण-मितायां स्वर्णशृंखलायां लम्बते स्म महाघण्टा। अनेकार्बुद-पद्म-मूल्यानि रत्नानि शिव-लिङ्गे निहितानि आसन्। स्वर्णमयं कलशमस्य उपरि अराजत। गजनीदेश-निवासी मोहम्मदः एनमनाशयत्। सर्वं रत्ननिचयं चापाहरत्। भारतीयो गृहमन्त्री नरशार्दूलो वल्लभभाई पटेलः अस्य जीर्णोद्धारम् अकारयत्।

वीर विक्रमादित्यराजसिंहासनम्, यवनशासनस्य मयूरसिंहासनमपि भारतीयं वैभवं स्मारयति।

चित्तोडस्य विजयस्तम्भः राजपुत्राणां वीरताम्, नालन्दा विश्वविद्यालयस्य भग्नावशेषाः च विद्यागौरवमद्यापि स्मारयन्ति। भारतवर्षे तीर्थे तीर्थे विशालानि मन्दिराणि भारतीयानां स्थापत्यकलां प्रमाणयन्ति। आबुपर्वते जैनानां दिलवारा-मन्दिरम्, मथुरायां रङ्गराजस्य मन्दिरं, काश्यां विश्वनाथस्य, मदुरायां द्रविडानां मन्दिरम्, काञ्चीपुरे एकाम्बरेश्वरस्य मन्दिरम्, दिल्लीनगरे बिरला-मन्दिरम् दर्शनीयानि। अन्यानि चासंख्यानि ईदृशानि मन्दिराणि सर्वत्र भारते।

दिल्ली-नगरे जामामस्जिदम्, अर्गलपुरे ताजमहलम् च भारते विद्यमानां यवन-कीर्तिमुद्घोषयति। अमृतसरे गुरुद्वारा स्वर्णमन्दिरं पञ्चाप-शिष्याणाम् शासनकालस्य गौरवं स्मारयति।

भारतस्य महाविशालेषु मन्दिरेषु बोधगयाऽपि महाविशालं मन्दिरम्। बौद्धानां नास्ति अस्मादधिकं पावनं स्थानम्। अत्रैव बोधिवृक्षोऽपि यत्र भगवान् बुद्धः बोधं सिद्धिम् च अलभत। महाराजः अशोकः एतत् मन्दिरं रचयामास। मूर्तं हीदं भारतीयं गौरवम्।

शब्दकोश:

त्रिविष्टपः	=तिब्बत	प्रघणः	=चौखट
प्रसूतः	=उत्पन्न	वृत्तम्	=वृत्तान्त, घटना
अग्रजन्मा	=ब्राह्मण	छदिः	=छत
उर्वरा	=उपजाऊ	स्थापत्यकला	=भवननिर्माणकला
मुम्बापुरी	=बम्बई	काञ्चीपुरम्	=काञ्जीवरम
अर्गलपुरम्	=आगरा।		

अभ्यासः

१ वाक्यों में प्रयोग करो :—

अग्रजन्मनः, प्रघणः, छदिः, उर्वरायाम्, त्रिविष्टपे।

२ इन प्रश्नों के उत्तर लिखो :—

(क) भारतीयानां सर्वप्रथमस्य ग्रन्थस्य किम् नाम ?

(ख) सर्वप्रथमेन सम्राज्ञा मनुना सांसारिकेभ्यः जनेभ्यः का आज्ञा प्रदत्ता ?

(ग) महाराजः भागीरथः किमकरोत् ?

(घ) भारतस्य कानि-कानि स्थानानि युष्माभिः अवलोकितानि ?

३ तुमने भारत में जो दर्शनीय स्थान देखा हो उसके संबंध में १० पंक्तियां संस्कृत भाषा में लिखो।

४ निम्नलिखित वाक्य के रेखांकित अंश में कौन सा कारक है ?
गंगानदी भारत भूमिं उर्वराम् करोति।
अब पुस्तक, पुष्प, पत्र, जल, राज्य आदि शब्दों को इसी कारक में प्रयुक्त करते हुए वाक्य बनाओ।

५ संस्कृत में अनुवाद करो :—
भारत सबसे अधिक प्राचीन देश है।
प्राचीन समय में विद्या और कौशल में यह संसार में अग्रणी था।
भारतवर्ष कृषिप्रधान देश है।
स्वतन्त्रता मिलने के बाद भारत ने औद्योगिक क्षेत्र में काफी उन्नति की है।
भारत की समस्याओं में से खाद्य तथा बेकारी की समस्या प्रमुख है।
भारत सरकार इन समस्याओं पर काबू पाने की कोशिश कर रही है।

अष्टादशः पाठः

शठे शठो जीर्णधनो बभूव

अस्ति कस्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्-पुत्रः । स च विभव-क्षयाद् देशान्तरं गन्तुमनाः । तस्य गृहे लोह-भार-घटिता पूर्व-पुरुषोपार्जिता तुला आसीत् । तां स कस्यचित् श्रेष्ठिनो गृहे निक्षेपं कृत्वा देशान्तरं प्रतस्थे ।

ततः सुचिरं कालं देशान्तरं यथच्छया भ्रान्त्वा पुनः स्वपुरम् आजगाम । श्रेष्ठिनञ्चोवाच---'भोः श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला ।'

श्रेष्ठी प्राह—'भोः । नास्ति । सा त्वदीया तुला मूषकै-र्भक्षिता ।

जीर्णधनः किञ्चिद् विचार्य आह—भोः श्रेष्ठिन् । नास्ति दोषस्ते, यदि सा मूषकैर् भक्षिता । ईदृग् एवायं संसारः ! न किञ्चिद् अत्र शाश्वतम् । अस्तु ! अहं नद्यां स्नानार्थं गमिष्यामि । तत् त्वम् आत्मीयं शिशुं स्नानोपकरणहस्तं मया सह प्रेषय ।'

सोऽपि श्रेष्ठी चौर्य-भयात्तस्य शंकितः स्वपुत्रमुवाच—"वत्स ! पितृव्योऽयं तव । स्नानार्थं नदीं यास्यति । तद् गम्यताम् अनेन सार्धम् स्नानोपकरणम् आदाय ।"

अथासौ श्रेष्ठि-शिशुः स्नानोपकरणम् आदाय प्रहृष्टमनास् तेन सह प्रतस्थे ।

तथानुष्ठिते वणिक् स्नात्वा, तं शिशुं नदीगुहायां प्रक्षिप्य, तद्द्वारं शिलया आच्छाद्य सत्वरं गृहम् उपागमत् ।

पृष्टश्च तेन श्रेष्ठिना—'भोः अभ्यागत ! कथ्यतां कुत्र मे शिशुः यस् त्वया सह नदीं गतः ?'

जीर्णधन आह—"महान् अयं खेदविषयः किं करोमि ? नदी तटात् सः श्येनेन हृतः ।"

श्रेष्ठी आह—"किं क्वचित् श्येनो बालं हर्तुं शक्नोति ? तत्समर्पय मे सुतम् । अन्यथा राजकुले निवेदयिष्ये ।

जीर्णधनः प्राह—'भो सत्यवादिन् ! यथा श्येनो बालं न नयति तथा मूषकाः अपि लोह-भार-घटितां महतीं तुलां न भक्षयन्ति । तद् अर्पय मे तुलाम्, यदि दारकेण प्रयोजनम् ।'

एवं विवदमानौ द्वावपि राजकुलं प्रातिष्ठताम्

तत्र श्रेष्ठी तारस्वेरण प्रोवाच—'भोः ! अब्रह्मण्यम् । अब्रह्मण्यम् ! मम शिशुर् अनेन चौरेणापहृतः ।

अथ धर्माधिकारिणस्तमूचुः—'भोः ! समर्प्यतां श्रेष्ठीसुतो । अपनीतो यदि भवता ।

जीर्णधन उवाच—'किम् करोमि ? पश्यतो मे नदीतटाच्छ्येनेन अपहृतः ।'

तच्छ्रुत्वा अधिकारिण ऊचुः—'भोः ! न सत्यम् अभिहितम् भवता । किं श्येनः शिशुं हर्तुं समर्थो भवति ?

जीर्णधनः—'भोः ! भोः ! श्रूयताम् !

"तुलां तु लोहसारस्य यत्र खादन्ति मूषकाः ।
राजन् ! तत्र हरेच् छ्येनो बालकं नात्र संशयः ।"

अधिकारिणः—'कथमेतत् ?'

ततः जीर्णधनः सभ्यानाम् अग्रे आदितः सर्वं वृत्तान्तं निवेदया, चक्रे ततस्तौ द्वावपि परस्परं सम्बोध्य तुला-शिशु प्रदानेन सन्तोषितौ ।

शब्दकोश:

अधिष्ठानम्	=नगर	तुला	=तराजू
निक्षेप:	=धरोहर	पितृव्य:	=चाचा
अभ्यागत:	=अतिथि	श्येन:	=बाज
तार-स्वर:	=ऊँची आवाज	अब्रह्मण्यम्	=महापाप होगया ! बचाओ, बचाओ!
लोहसार:	=फौलाद		

अभ्यास:

१ इन प्रश्नों के उत्तर संस्कृत में दो :—

(क) जीर्णधनो नाम वणिक्-पुत्र: कुत्र, किमर्थञ्च जगाम ?

(ख) तेन वणिक्-पुत्रेण गमनसमये किं कृतम् ?

(ग) स: वणिक्-पुत्र: श्रेष्ठिन: शिशो: किम् अकरोत् ?

(घ) को अभिप्राय: अस्या: कथाया: ?

२ नीचे दिए गए समस्त पदों का विग्रह करो :—

समस्त पद		विग्रह
विभव-क्षयाद्	=	......
पूर्व-पुरुषोपार्जिता	=	......
स्नानोपकरणहस्तम्	=	......
चौर्य-भयात्	=	......
धर्माधिकारिण:	=	......
तुला-शिशु-प्रदानेन	=	......

३ निम्नलिखित वाक्यों को वर्तमान काल में बदलो :—

कस्मिश्चित् आश्रमे एको मूषकोऽवसत् ।

छात्रा: पाठशालाम् अगच्छन् ।

यूयम् अत्र अक्रीडत ।
अहम् ईश्वरं अवन्दे ।
त्वम् राजानम् अभाषेथाः ।
द्वारपालः गृहस्वामिनम् न्यवेदयत् ।

४ नीचे कुछ अशुद्ध वाक्य दिए गए हैं, उन्हें शुद्ध करके लिखो ।
जैसे :—

अशुद्ध वाक्य	**शुद्ध वाक्य**
त्वं राज्यस्य रक्षसि ।	त्वं राज्यं रक्षसि ।
मया विद्या पठितम् ।	......
भोजनं खादन् ब्राह्मणं फलं देहि ।	......
सः लेखनम् शक्नोमि ।	......
राजा राज्यस्य भोजति ।	......
दशमे कक्षायां शतानि छात्राः ।	......

एकोनविंशः पाठः

अज्ञातपुत्रस्य नामकरणम्

काचन कर्षककन्या प्रतिदिनं धेनूः दुग्धे स्म । अथ एकदा असौ गोशालातः पयःपूर्णकलशं शिरसि संस्थाप्य प्रत्यावर्त्तमाना चिन्तयति स्म—"अस्मिन् कलशे यद् दुग्धं वर्तते तत् प्रथमतः दधि-नवनीतेन विपरिणमय्य घृतं विधाय आपणे विक्रेष्ये । लब्धेन च धनेन द्वादश कुक्कुटाण्डानि क्रेष्यामि । तानि निर्भिद्य कुक्कुटशिशवो निर्गमिष्यन्ति । तासाम् अपि कुक्कुटीनाम् अण्डानि शिशवः च सम्पत्स्यन्ते ।

"न चिरात् च मे कुक्कुटशाला भविष्यति । ततः च कतिचित् कुक्कुटान् विक्रीय अभिनवं कञ्चुकं क्रेष्यामि । रुचिरतरकञ्चुकं तं परिधाय यथासमयम् आपणं गमिष्यामि । तत्र च यदा तरुणाः प्रणयवाक्यानि वदिष्यन्ति तदा शिरः सञ्चाल्य तान् अवज्ञोपहतान् विधाय अन्यतः गमिष्यामि ।"

एवं चिन्तयन्ती सा यावत् उपगोशालं शिरः समचालयत् तावद् दुग्धकुम्भो भूमौ निपतितः सहस्रधा भग्नः च । अत एव आङ्गलैर् उच्यते—'शावकानां निर्गमात् पूर्वम् अलं तेषां गणनया' इति ।

पञ्चतन्त्रे ब्राह्मणसक्तुकलशकथा एतादृशम् भावम् अनुसृत्य एव उपवर्णिता । कस्मिंश्चिन् नगरे कश्चित् स्वभावकृपणो नाम ब्राह्मणः प्रतिवसति स्म । तेन भिक्षार्जितैः सक्तुभिर् भुक्तशेषैः कलशः सम्पूरितः । तं च घटं नागदन्तके अवलम्ब्य तस्य अधस्तात् खट्वां निधाय प्रतिनिशम् सततम् एकदृष्ट्या तम् एव अवलोकयति स्म । अथ कदाचिद् रात्रौ सुप्तः चिन्तयामास—

"परिपूर्णो अयं घटस् तावत् सक्तुभिर् वर्तते। तद् यदि दुर्भिक्षं भवति तद् अनेन रूप्यकाणां शतम् उत्पद्यते। ततस् तेन मया अजाद्वयं ग्रहीतव्यम्। ततः षाण्मासिकप्रसववशात् ताभ्यां यूथं भविष्यति। ततो अजाभिः प्रभूताः गाः ग्रहीष्यामि। गोभिर् महिषीः, महीषिभिर् वडवाः। वडवाप्रसवतः प्रभूता अश्वाः भविष्यन्ति। तेषां विक्रयात् सुसुवर्णं भविष्यति। तेन प्रभूतेन सुवर्णेन च चतुःशालं गृहं सम्पत्स्यते।

"ततः कश्चिद् धनाढ्यो ब्राह्मणो मम गृहम् आगत्य प्राप्तवयस्कां रूपाढ्यां कन्यां मह्यं दास्यति। तत्सकाशात् पुत्रो मे भविष्यति। तस्य अहं सोमशर्म इति नाम करिष्ये। ततस् तस्मिन् जानुप्रचलनयोग्ये सञ्जाते अहं कदाचित् पुस्तकं गृहीत्वा अश्वशालायाः पृष्ठदेशे उपविष्टः तद् अवधारयिष्यामि।

"अत्रान्तरे सोमशर्मा मां दृष्ट्वा जनन्युत्सङ्गात् जानुप्रचलनपरो अश्वखुरासन्नवर्ती भूत्वा मत्समीपम् आगमिष्यति। ततो अहं ब्राह्मणीं कोपाविष्टो अभिधास्यामि—गृहाण तावद् बालकम् इति। सापि गृहकर्मव्यापृततया अस्मद्वचनं न श्रोष्यति। ततो अहम् समुत्थाय तां पादप्रहारेण दण्डयिष्यामि।"

एवं तेन ध्यानस्थितेन तथैव पादप्रहारो दत्तः यथा स घटो भग्नः, सक्तुभिः च स्वयं स एव पाण्डुरतां गतः। उच्यते—

अनागतवतीं चिन्तां

स एव पाण्डुरः शेते सोमशर्मपिता यथा।

सन्ति आङ्गलभाषायां प्रचलिता अस्य अर्थस्य प्रकाशकाः उक्तयः—'अगृहीत्वा भल्लूकं मा तस्य चर्म विक्रेष्ठाः।' 'यदद्यापि न संवृत्तं तदर्थं मा हि मोदिष्ठाः।' 'यावन् मृगो न गृह्येत तावत् तं मा प्रदाः।'

शब्दकोश:

निर्भिद्य	=तोड़कर ।	सम्पत्स्यन्ते	=उत्पन्न होंगे
उपहत	=तिरस्कृत ।	नागदन्तक	=खूँटी
वडवा	=घोड़ी ।	चतुःशाल	=चार आंगन वाला
अवधृ	=विचार करना	उत्सङ्ग	=गोद
व्यापृतः	=संलग्न ।	पाण्डुर	=सफेद
भल्लूकः	=भालू ।		

अभ्यासः

१ अजातपुत्रः=अनुत्पन्न पुत्र, कर्षक-कन्या=किसान की कन्या, प्रति-दिनम्=हररोज, पयः-पूर्ण-कलशम्=दूध से भरे घड़े को। दधि-नवनीतेन=दही-मक्खन के रूप से।
इन पदों में दो या तीन शब्द मिला कर एक-एक विभक्त्यन्त शब्द या पद बना है। यह समास हैं। इन्हें समस्तपद कहते हैं अर्थात् जुड़े हुए पद।
इस प्रकार के अन्य समस्तपद पाठ में से छांटो। इन के अर्थ भी लिखो।

२ समस्तपदों का विग्रह संस्कृत में उनका अर्थ दर्शाने के लिये किया जाता है। इस प्रकार अर्थ लिख सकना भी आना चाहिए। ध्यान से पढ़ो और हिन्दी अर्थ से मिलान करो :—

(क) आजात-पुत्रः=अजातः सः पुत्रः इति।
(ख) कर्षक-कन्या=कर्षकस्य कन्या।
(ग) प्रतिदिनम्=दिन दिनम् इति।
(घ) पयः-पूर्ण-कलशम्=पयसापूर्णम् =पयःपूर्णम् पयःपूर्णं च तत् कलशम् इति।
(ङ) दधि-नवनीतेन=दधि च नवनीतम् च इति दधिनवनीतं तेन।

३ इन के नाम विग्रह के द्वारा इस प्रकार जाने जाते हैं :—

(क) अजातः सः पुत्रः = विग्रह में "अजातः" विशेषण है और पुत्रः विशेष्य है। जहां विशेषण विशेष्य मिलें और बीच की विभक्ति का लोप हो वह 'कार्मधारय' कहाता है।

नीचे दिये पदों में कर्मधारय समास है, विग्रह करो।

कृष्ण-सर्पः	=	...	...
षाण्मासिक-प्रसवः	=	...	...
पण्डित-जवाहरलालः	=	...	...
पूर्ण कलशः	=	...	...
पुरुषसिंहः	=	...	...
एकदृष्ट्या	=	...	...

(ख) कर्षकस्य कन्या = विग्रह में षष्ठी है। समास में उस का लोप कर दिया गया है। उत्तर-पद कन्या के अर्थ की प्रधानता है। जहाँ पूर्वपद की विभक्ति का लोप कर दिया जाए और उत्तर पद का अर्थ का प्रधान हो वह तत्पुरुष समास होता है। ये तत्पुरुष शेष छ विभक्तियों में होता है। अर्थ से विभक्ति जानी जाती है।

दुःखम् आपन्नः = विग्रह में द्वितीया विभक्ति है।

मात्रा सदृशः = यहां 'मात्रा' में तृतीया विभक्ति है।

भूताय बलिः = 'भूताय' चतुर्थी है।

चौराद् भयं = 'चौराद्' पञ्चमी है।

सभायां पण्डितः = 'सभायां' सप्तमी है।

[१] कर्षक कन्या की तरह इन के समस्त पद लिखो।

[२] पाठ में आये इन समासों के विग्रह करो। नाम भी लिखो।

समस्त पद	विग्रह	समास नाम
गोशाला	गवां शाला	षष्ठी तत्पुरुष
कुक्कुटाण्डानि =	...	...
कुक्कुटशिशवः =	...	...
कुक्कुटशाला =	...	...
अवज्ञोपहतान् =	...	...
दुग्धकुम्भः =	...	...
स्वभावकृपणः =	...	...
भिक्षार्जितैः =	...	...
भुक्तशेषैः =	...	...
वडवाप्रसवतः =	...	...
धनाढ्यः =	...	...
रूपाढ्याम् =	...	...
अश्वशालागाः =	...	...
जनन्युत्सङ्गात् =	...	...
अश्वखुरम् =	...	...
मत्समीपम् =	...	...
गृह-कर्म =	...	...
गृहकर्म-व्याप्तता =	...	...
अस्मद्वचनम् =	...	...
पादप्रहारेण =	...	...
ध्यान-स्थितेन =	...	...

(ग) प्रति दिनम्—दिनं दिनम् इति—यहां विग्रह में अव्यय का अर्थ बताया जाता है। समास में पहला पद अव्यय है। जहां पहला पद अव्यय हो, और साथ ही समस्त पद भी अव्यय हो वह अव्ययीभाव समास होता है। इस के आगे की विभक्ति प्रायः लुप्त हो जाती है।

—पाठ में प्रयुक्त इन अव्ययीभावों का विग्रह करो और अर्थ बताओ :—

समस्त पद	विग्रह	अर्थ
यथासमयम्=	समयम् अनतिक्रम्य इति	समय को न लांघकर, समयानुसार
उपगोशालम्=	...	...
प्रतिनिशम्=	...	...
दुर्भिक्षम्—	...	...
सुसुवर्णम्=	...	...

(ङ) दधि च नवनीतं च इति दधिनवनीतम् तेन 'दधिनवनीतेन' इस समस्त पद के विग्रह में 'च'=आया है। अर्थात् 'और' के अर्थ में समास है। 'और' ने दधि और नवनीत को मिला दिया है। इसे 'द्वन्द्व' समास कहते हैं।

इसी प्रकार के नीचे वाले समास हैं उन के विग्रह और अर्थ लिखो :

समस्त पद	विग्रह	अर्थ
सीताः रामौ	...	...
राम-कृष्णौ	...	...
रामलक्ष्मणौ	...	...
सुख-दुःखे	...	...
राजविद्वान्सौ	...	...
काकोलूकयोः	...	...

४ इन विग्रहों के समस्त पद बनाओ, समास का नाम भी बताओः—

विग्रह	समस्त पद	नाम
भिक्षुकं भिक्षुकम् इति	प्रतिभिक्षुकम्	अव्ययीभाव
मासं मासम् इति	...	...
छात्रः छात्रः इति	...	...

पीतम् वस्त्रम्	...	...
स्थूलं पुस्तकम्	...	...
स्वामी दयानन्दः	...	...
दशरथस्य पुत्रः	...	...
आत्मनः बलम्ः	...	...
भारतस्य पुत्रः	...	...
सुखम् आपन्नः	...	...
रोगम् प्राप्तः	...	...
पित्रा सदृशः	...	...
पुत्रेण समः	...	...
काकाय बलिः	...	...
कन्यायै धनम्	...	...
स्तम्भाय काष्ठम्	...	...
अध्यापकाद् भयम्	...	...
सर्पाद् भयम्	...	...
चौराद् भयम्	—	...
गृहे शूरः	...	...
तीर्थे काकः	...	...

५ नीचे लिखे अपठित गद्यांश का हिन्दी में अर्थ करो—

हस्तेन लिखितं रामायणं कुत्र रक्षितमस्ति। रावणेन सीता लङ्कां नीता। गतो हनुमान् सीतान्वेषणाय। लङ्कायाम् आगतं हनुमन्तं सुग्रीवः अकथयत् रावणेन हृतायाः सीतायाः कः समाचारः। त्वया दृष्टया सीतया कश्चित् समाचारः प्रेषितः। अपि सीतायै कारावासे स्थितायै रावणः क्रुध्यति। रावणेन शासितासु लङ्कासु सर्वे दुष्टा एव, शिष्टोऽपि वा कश्चित्।

विंशः पाठः

गणतन्त्र–दिवसः

अद्य भारते गणतन्त्र-दिवसः । एतत् एव दिनं यदा भारतस्य नेतारः स्वतन्त्रस्य भारतस्य स्वतन्त्रं विधानं स्वीचक्रुः । ततः प्रभृति शासने च गण-तन्त्र-पद्धतिं परिपालयन्ति ।

अस्मिन् दिने महान् समारोहः भवति । जनवरी मासः अयम् । षड्विंशतिः च तिथिः । शीतबहुला प्रातःवेला । भारतद्वारे अद्य आदृष्टि-प्रसारं नरशिरांसि एव दृश्यन्ते । बालाः, अबलाः, वृद्धाः, युवकाः च प्रातः शीघ्रम् मध्य रात्रे जाग्रति । पाथेयम् उपकल्पयन्ति । सत्वरं एव समारोह-स्थलम् आगच्छन्ति । अग्रिमं च स्थानं अधितिष्ठन्ति । दर्शनीयो अपूर्वोः अयं सम्मर्दः ।

एकस्यां दिशि राष्ट्रपतिभवनम्, अपरस्यां उत्तुङ्गं भारतद्वारम् । मध्ये च त्रिरंगा महाध्वजा, समीपे एव च राष्ट्रपतेः अवस्थानाय उच्चः मञ्चः । समीपतः सहस्रशः आसन्द्यः राज्याधिकारिणाम् अवस्थानाय । राजमार्गे च ध्वनिविस्तार-यन्त्रस्य प्रसारः ।

पदे पदे सैनिकाः व्यवस्थापयन्ति प्रजाः । आशुरथेन विद्युत्चक्रया च परिभ्रमन्ति व्यवस्थायै उच्चाधिकारिणः । स्थूलं लोहनलप्राचीरम् उल्लंघयन्ति अग्रे आगुन्तकामाः दर्शकाः ।

सन्तुलिते नव-वादन-समये राष्ट्रपतिः ध्वजाम् उत्तोलयति । शतघ्न्यः च एकविंशतिभिः गोलैः ध्वजाम् अभिनन्दन्ति । उपरि च आकाशे विमानानि पुष्पवर्षां कुर्वन्ति, अतीव वेगेन च संहताः युद्धकौशलं प्रदर्शयन्तः उपसर्पन्ति । वायुयानानां गोलानां च तुमुलः निनादः हृदयम् उल्लासयति ।

ततः सैनिकयात्रा प्रारभ्यते। तस्मिन् अग्रतः विशालेषु आशुरथेषु शस्त्राणां अस्त्राणां च प्रदर्शनं भवति। ततः सहस्रशः सैनिकाः पंक्तिवद्धा, चित्रलिखिताः इव दर्शकानां हृदयानि वशीकुर्वन्ति। व्योम-सैनिकाः, सामुद्रिक-सैनिकाः, स्थल-सैनिकाः च सैनिकवेशेन सदृश्या गत्या स गच्छन्ते, भारतस्य अतुलं बलं च प्रमाणयन्ति। ततः भारतीयाः महावीराः विद्यालयानां युवकाः युवतयः च वीरान् अनुकुर्वन्तश् चलन्तः "भारताय स्वप्राणान् धारयन्ति" इति ख्यापयन्ति। ततः आश्विकाः, उष्ट्रारोहिणः, वादकाः अन्ये च संगच्छन्ते।

पृष्ठतः च विभिन्नानां प्रान्तानां, कलयन्त्राणां, करयन्त्रणां, जातीनां, संस्कृतीनां, विभिन्न वेष–भूषाणां च विविधानि दृश्यानि जनान् अचल-दृष्टीन् कुर्वन्ति।

अहोभाग्यं भारतीयानां यत् स्वतन्त्राः वयं स्वराज्यसुखम् अनुभवामः।

शब्दकोशः

आदृष्टि-प्रसारम्	=जहाँ तक दृष्टि फैले	आसन्दी	=कुर्सी
		ध्वनि-विस्तार-यंत्र	=लाउडस्पीकर
पाथेयम्	=मार्ग का भोजन	शतघ्नी	=तोप
सत्वरम्	=शीघ्र	तुमुलः निनादः	=घनघोर शब्द
सम्मर्दः	=भीड़ भाड़	व्योम सैनिकाः	=एयर फोर्स
उत्तुङ्गः	=ऊँचा	ख्यापयन्ति (ख्या)	=प्रसिद्ध करते हैं

अभ्यासः

१ संस्कृत में उत्तर लिखो :—

(क) गणतन्त्र-दिवसे किम् भवति ?

(ख) गणतन्त्र-दिवसस्य समारोहः दिल्ल्यां कुत्र भवति ?

(ग) कथं परिभ्रमन्ति उच्चाधिकारिणः ?

(घ) यात्रायां के के सम्मिलन्ति ?

२ निम्नलिखित वाक्यों में आज्ञार्थक (लोट्) क्रिया का प्रयोग करो :—

(क) प्रातः एव अग्रिमं स्थानम् अधितिष्ठन्ति ।
(ख) पदे पदे सैनिकाः व्यवस्थापयन्ति प्रजाः ।
(ग) राष्ट्रपतिः ध्वजाम् उत्तोलयति ।
(घ) वायुयानानि अतीव वेगेन उपसर्पन्ति ।
(ङ) युद्धयन्त्राणां विशाला पंक्तिः कौतूहलं जनयति ।

३ वाक्यांशों को आपस में मिलाओ :—

अस्माकं विद्यालयः	अवकाशः भवति ।
अयं बालः	तत्र समक्षे सन्ति ।
छात्राः पठनाय	अष्टवादने प्रारभते ।
अस्माकं क्रीडा-क्षेत्राणि	अष्ट-वर्षीयः
प्रति-रविवासरम्	महाविद्यालये समायान्ति :

४ इन शब्दों के वाक्य बनाओ :—

पाथेयम्, सत्वरम्, सम्मर्दः, उत्तुङ्गः, शतघ्नी, तुमुलः निनादः ।

५ इस पाठ का आधार लेकर 'गणतन्त्र दिवस' पर अपनी संस्कृत भाषा में १० वाक्य लिखो ।

६ संस्कृत में अनुवाद करो :—

श्रीकृष्ण ने अर्जुन से कहा,
अर्जुन, आत्मा अमर है । आत्मा कभी नहीं मरता ।
यह केवल शरीर है जो नष्ट होता है ।
आत्मा कभी किसी को नहीं मारता ।
न ही आत्मा कभी मारा जाता है ।
आत्मा कभी पैदा नहीं होता ।
यह कभी नहीं मरता ।
यह नित्य है ।

एकविंशः पाठः

भोजस्य प्रज्ञा मुञ्जस्य तापः

धारा-राज्ये सिन्धुल-संज्ञो राजा चिरं प्रजाः पालयाञ्चक्रे। तस्य वृद्धत्वे भोज इति पुत्रः संजातः। तदा पिता आत्मनो जरां ज्ञात्वा स्वानुजाय मुञ्जाय राज्यम् ददौ। ततः सिन्धुले दिवंगते मुञ्जो बुद्धिसागर-नामानं प्रधानमामात्यं दूरीकृत्य तत्पदे अन्यं न्यवेशयत्।

ततश्चैकदा ज्योतिःशास्त्रनिपुणो ब्राह्मणः सभाम् आजगाम। मुञ्जः प्राह, 'भोजस्य जन्मपत्रिकां विधेहि।'

भोजं निरूप्य दैवज्ञः प्राह, 'भोजस्य भाग्योदयं वक्तुं विरञ्चिरपि नालम्। पञ्चाशत्पञ्च वर्षाणि भोजराजेन राज्यं भोक्तव्यम्।'

तदाकर्ण्य राजा विच्छायवदनो बभूव। वत्सदेशाधीश्वरं स्ववशंवद-माहूय भोजस्य वधाय आशिदेद।

ततःप्रदीप्ते वैश्वानरे, समुद्भूत-धूम-स्तोमेन मलीमसे नभसि, पाप-त्रासाद् इव पश्चिम-पयो-निधौ मग्ने मार्तण्डमण्डले, महामाया-भवनम् आसाद्य प्राह भोजम् वत्सराजः। :कुमार ! ज्योतिःशास्त्र-विशारदेन केनचिद् ब्राह्मणेन तव राज्य-प्राप्तौ उदीरितायां वाचि राज्ञा भवद्-वधो व्यादिष्टः।" इति।

भोजः प्राहः 'केनैवं च विलङ्घ्यते विधिगतिः पाषाणरेखासखी' ? ततो वट-वृक्षस्य पत्रमादाप, पुटी-कृत्य, जंङ्घां छुरिकया छित्वा तत्र पुटके रक्तमारोप्य, तृणेन एकस्मिन् पत्रे एकं श्लोकं लिखित्वा वत्सराजाय च तत् दत्वा प्राह।

'महाराज ! पत्रमेतन् नृपाय दातव्यम्। त्वम् अपि राजाज्ञां परिपालय।' इति।

अथ पत्रं पठित्वा वैराग्यम् आपन्नो वत्सराजः 'क्षमस्व' इत्युक्त्वा, भोजं प्रणनाम । तञ्च रथे निवेश्य नगराद् बहिर् घने तमसि नीत्वा, पुनः स्व-गृहमागमय्य भूमि-गृहान्तरे निक्षिप्य भोजं ररक्ष ।

स्वयमेव कृत्रिम-विद्या-विद्भिः निमीलित-नेत्रं भोजकुमार-मस्तकं कारयित्वा, तच्च आदाय, राजानं दत्त्वा न्यवेदयत् ।

वत्सराजः—"श्रीमता यद् आदिष्टं तत् साधितम् ।"

राजा—"वत्सराज ! खड्गप्रहार-समये तेन किमुक्तम् !"

वत्सराजः तत् पत्रं प्रायच्छत् । श्लोकोऽयं तत्र विन्यस्तः आसीत्—

"मान्धाता च महीपतिः कृतयुगालंकार-भूतो गतः,
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते !
नैकेनापि समं गता वसुमती, मुञ्ज ! त्वया यास्यति ॥"

राजा तु तद् विचिन्त्य निस्संज्ञो भूमौ पपात । ततः कथञ्चित् देवी-करकमल-चालित-पटानिलेन संज्ञाम् आपन्नः करुण-करुणं विलपन् देवं प्राह ।

मुञ्जः—देवि ! मा मां स्पृश । हा हा ! पुत्रघाती खल्वहम् । धिङ् मां पुत्रघातिनम् ।'

ततः द्वारपालानानाय्य ब्राह्मणान् अकारयितुं दिदेश । ततः समागतान् ब्राह्मणान् ननाम, प्रोवाच च ।

मुञ्जः—'मया पुत्रो हतस्तस्य प्रायश्चित्तं वदध्वम् ।'

ब्राह्मणाः ऊचुः—'राजन् सहसा वह्निम् आविश ।'

ततो रात्रावेव वह्निप्रवेशनं निश्चितवति राज्ञि सर्वे सामन्ताः, वत्सराजाधिगतसकलवृत्तान्तो बुद्धिसागरः, पौराश्च सभागृहम् आजग्मुः ।

ततो मुहूर्तेन कोऽपि कापालिकः तत्रागतः ।

बुद्धिसागरः-कापालिक "अप्यस्ति त्वयि कश्चित् चमत्कारकारी कलाविशेषः ओषधिविशेषो वा ।"

कापालिकः—"सर्पदष्टं, विषव्यापन्नं, शस्त्रभिन्नशिरस्कं वा विगत व्याधिं कुर्वीमहे ।"

मुञ्जोऽपि श्रुत-सकल-वृत्तान्तः सत्वरं कापालिकं प्रणम्य प्राह—"योगीन्द्र ! मया हतस्य पुत्रस्य प्राणदानेन मां रक्ष ।"

कापालिक ऊचे—"मा भैषीः ! पुत्रस्ते न मरिष्यति । शिवप्रसादेन गृहमेष्यति । श्मशान-भूमौ बुद्धिसागरेण होमद्रव्याणि प्रेषय ।'

तथानुष्ठिते भोजोऽपि गूढरूपेण तत्र नीतोयोगिना भोजो जीवितः इति प्रथितम् । राजा मुञ्जो भोजाय राज्यं ददौ । स्वयं च तपोवनभूमिं गत्वा तपस्तेपे ।

अहो ! अनुकरणीयम् संङ्कटेऽपि धैर्यं प्रत्युत्पन्नमतित्वं च भोजस्य, स्वामिभक्तिर् गुणः ग्राहित्वं च वत्सराजस्य, निन्दनीयः राज्यलोभः प्रशंसनीया च स्वदोषानुभूतिः मुञ्जस्य ।

शब्दकोशः

विरञ्चिः	=विधाता, ब्रह्मा
वशंवदः	=अनुचर, सेवक
वैश्वानरः	=अग्नि
मलीमसः	=मैला
वृष्णिन्	=यदुवंशी
पुटकः	=दौना
विन्यस्तः	=लिखा हुआ
दशास्यान्तकः	=दस मुंह वाले रावण को मारने वाला अर्थात् राम
कापालिकः	=कपाल-खोपड़ी से तन्त्र-मन्त्र सिद्ध करने वाला ।
विच्छाय-वदनः	=कान्तिहीन मुखवाला
स्तोमः	=समूह
मार्तण्ड-मण्डलः	=सूर्य का घेरा
वटः	=बड़
भूमिगृहम्	=तहखाना
कृतयुगः	=सत्ययुग, जिसमें श्रेष्ठ व्यक्तियों का बाहुल्य होता है
वसुमती	=धरती

अभ्यासः

१ निम्नस्थ शब्द-युगलों का अर्थ-भेद बताओ और उपयुक्त वाक्यों में प्रयोग करो :—

(क) उपपन्नः, आपन्नः (ख) जातः, ज्ञातः, (ग) वधः, बन्धः

(घ) निवेदनं, निवेशनम् (ङ) प्रेषणम्, प्रवेशनम् ।

२ सन्धि-विच्छेद करो —

ततश्चैकदा, विरञ्चिरपि, नालम्, तदाकर्ण्य, एतन्नृपाय, नगराद्बहिर्नीत्वा, तञ्चादाय, श्लोकोऽयम्, रात्रावेव, अप्यस्ति, तपस्तेपे ।

३ नीचे लिखे प्रश्नों के उत्तर संस्कृत में लिखो —

(क) मुञ्जस्य भोजेन सह कः सम्बन्धः आसीत् ?

(ख) भोजस्य वधाय मुञ्जः किमर्थम् आदिदेश ;

(ग) भोजः कैर् गुणैः मृत्युम् अपि जितवान् ?

(घ) कथं कस्मिन् च भोजः श्लोकं लिखितवान् ?

(ङ) मुञ्जस्य हृदयं भोज-लिखितस्य पत्रस्य कतमेन वाक्येन भावाभिभूतं कृतम् ?

(च) किं शिक्षयति कथा एष अस्मान् ?

४ भोज द्वारा पत्ते पर लिखे गये श्लोक को अर्थ सहित लिखो ।

द्वाविंशः पाठः

कुम्भ जातकम्

बोधिसत्त्वः किल कदाचिच्छक्रो देवानामिन्द्रो बभूव। दिव्यानां विषय-सुखानां निकाम-लाभी सन्नपि करुणावशान्नैव लोकार्थ-चर्यायां शिथिलं मनश्चकार।

अथ कदाचित् स महात्मा सर्वमित्र–नामानं राजानम् अकल्याण-मित्र-सम्पर्क-दोषात् सपौरजानपदं मद्यपान-प्रसङ्गाभिमुखं ददर्श। तत्र चास्य अदोष-दर्शिताम् महादोषतां च मद्यपानस्य, अवेक्ष्य महत्या करुणया पीड्यमान-हृदयश् चिन्तामापेदे, "कष्टम्! इयम् आपद् आपतिता लोकस्य। तत्किमत्र प्राप्तकालं स्यात्? ......भवतु दृष्टम् :—

प्रधान-भूतस्य विचेष्टितानि, जनोऽनुकर्तुं नियतस्वभावः।
इत्यत्र राजैव चिकित्सनीयः, शुभाशुभं तत्प्रभवं हि लोके॥

इति विनिश्चित्य स महा-सत्त्वस् तप्तकाञ्चनवर्णम् ओजस्वि ब्राह्मं वपुर् निर्माय, सुरापूर्णं च वाम-पार्श्वस्थं नातिवृहन्तं कुम्भं विधाय, सर्वमित्रस्य राज्ञः परिषदि प्रवृत्तासु मधु–कथासु पुरतोऽन्तरिक्षे प्रादुरभूत्। विस्मय-बहुमानार्विजतेन च तेन राजजनेन प्रत्यर्च्यमानः, सजल इव जलधरो गम्भीरम् अभिनदन्नुच्चैरुवाच "घटमेनम् इच्छति कः क्रयेण वः?"

अथैनं स राजा सविस्मयः सकौतूहलः च सबहुमानम् ईक्षमाणः कृताञ्जलिर् उवाच :—

दिप्त्या नवार्क इव, चारुतया शशीव,
संलक्ष्यसे च वपुषाऽन्यतमो मुनीनाम् ।
तद् वक्तुमर्हसि, यथा विदितो ऽसि लोके,
संभावना हि गुणतस्त्वयि नो विचित्राः ॥

शक्र उवाच—

पश्चादपि ज्ञास्यसि योऽहम् अस्मि, घटं त्विदं क्रेतुमितो घटस्व ।
न चेद्भयं ते पर-लोक-दुःखाद् इहैव तीव्र-व्यसनागमाद् वा ॥
राजा उवाच—अपूर्वः खल्वयम् अत्र भवतो विक्रयारम्भः—

गुण-संवर्णनं नाम, दोषाणां च निगूहनम् ।
प्रसिद्ध इति लोकस्य पण्यानां विक्रयेक्रमः ॥

युक्तो वाऽनृत-भीरूणां त्वद्विधानामयं विधिः ।
न हि कृच्छ्रेऽपि संत्यक्तुम् सत्यम् इच्छन्ति साधवः ॥

तदाचक्ष्व महाभाग ! पूर्णः कस्य घटोन्वयम् ।
किं वा विनिमये प्राप्यम् अस्मत्तस् त्वादृशैरपि ॥

शक्र उवाच—श्रूयतां महाराज !

यत् पीत्वा मद-दोष-विह्वलतयाऽस्वतन्त्रश् चरन्,
देशेष्वप्रपतेष्वपि प्रपतितो, मन्दप्रभावस्मृतिः ।
भक्ष्याऽभक्ष्य-विचारण-विरहितः तत्तत् समास्वादयेत्,
तत्संपूर्णम्, इमं गतं क्रय-पथं, क्रीणीत कुम्भाऽधमम् ॥

पीत्वोचितामपि जहाति ययाऽत्मलज्जाम् ।
निर्ग्रन्थवद्वसन-संयम-खेद-मुक्तः ॥
धीरं चलेत् पथिषु पौर-जनाऽकुलेषु ।
सा पण्यतामुपगता निहिताऽत्र कुम्भे ॥

यत्र प्रसक्तानि कुलानि नेशुः, लक्ष्मी-निकेतान्य उदितोदितानि ।
उच्छेदनी वित्तवतां कुलानां सेयं घटे क्रय्यतयाऽधिरुढा ॥

शीलं निमीलयति, हन्ति यशः प्रसह्य,
लज्जां निरस्यति, मतिं मलिनीकरोति ।
यन्नाम पीतम् उपहन्ति गुणाँश्च तास्तान् ।
तत्पातुम् अर्हसि कथं नृप ! मद्यम् अद्य ॥

अथ स राजा तैस्तैस्तस्य हृदय-ग्राहकै-र्हेतुमद्भिर्वचोभिर् अवगमित-मद्य-पानदोषो मद्य-प्रसङ्गाद-प्रवृत्ताभिलाषः

शक्रम् उवाच—

स्निग्धः पिता विनय-भक्ति-गुणाद गुरुद् वा,
यद् वक्तुम अर्हति नयानयविन् मुनिर् वा ।
तावत् त्वया स्वभिहितं हितकाम्यया मे,
तत्कर्मणा विधिवद् अर्चयितुं यतिष्ये ॥

इदं च तावत् प्रतिपूजनम् अर्हति नोऽत्रभवान् प्रति-ग्रहितुम्ः—

ददामि ते ग्राम-वरांश्च पञ्च,
दासी-शतं, पञ्च गवां शतानि ।
सदश्व-युक्तांश्च रथान् दशेमान्,
हितस्य वक्ता, हि गुरु र्ममासि ॥

शक्र उवाच—

अर्थोऽस्ति न ग्राम वरादिना मे सुराधिपं मामभिगच्छ राजन् !
अपास्य तस्मान्मदिरा प्रसङ्ग धर्माश्रयात् मदविषयं भजस्व ॥
इत्युक्त्वा शक्ररूपो बोधिसत्वस् तत्रैवान्तर्दधे । स च राजा सपौरजानपदो मद्य पानाद् विरराम ॥

शब्दकोशः

लोकार्थ-चर्या	=परोपकार	पौरः	=पुरवासी नागरिक
जानपदः	=जनपद वासी, देशवासी	चिकित्सनीय	=इलाज करने योग्य

निकामलाभी	=यथेच्छ लाभ करने वाले	ब्राह्मम्	=ब्राह्मण का
व्यसनम्	=मुसीबत	घटस्व	=चेष्टा करो (घट् चेष्टायाम्=लोट्)
निगूहनम्	=छुपाना	अनृत-भीरू:	=झूंठ से डरने वाले
कृच्छ्रे	=कष्ट में	कुम्भाधमम्	=भौण्डे घड़े को
निर्ग्रन्थवद्	=गांठ खुले वस्त्र, धोती आदि।		

अभ्यास :

१ भगवान् इन्द्र ने ब्राह्मणरुप में मद्यपान के जो दोष बताये हैं उन का अपने शब्दों में उल्लेख करो।

२ मद्य-विक्रेता का सर्व-मित्र राजा पर क्या प्रभाव पड़ा? क्या उसने मद्य-भाण्ड खरीदा, यदि नहीं तो क्यों?

३ 'अपूर्व खल्वयम् अत्रभवतो विक्रयारम्भ:'—वाक्य में मद्यविक्रय की किस अपूर्वता का उल्लेख है? सामान्य विक्रय कैसा होता है, बताओ।

४ मद्य-विक्रयी कौन था, उस ने मद्य-विक्रय क्यों आरम्भ किया? उस के विक्रय का क्या परिणाम निकला।

५ संस्कृत में इन उत्तर-वाक्यों के प्रश्न क्या हो सकते हैं, लिखो—

(क) मद्यपानस्य महादोषताम् अवेक्ष्य शक्रश् चिन्तामापेदे।

(ख) सर्वमित्रस्य परिषदि प्रादुरभूत् शक्र:।

(ग) शक्र: उवाच-"अर्थोऽस्ति न ग्राम-वरादिना मे।

(घ) स राजा मद्य-पानाद् विरराम।

६ सन्धि-विच्छेद करो :—

कदाचिच्छक्रो। सन्नपि। मनश्चकार। जनोऽनुकर्तुम्। इत्यत्र। राजैव। दुःखाद् इहैव। अभिनदन्नुच्चैरुवाच। शशीव। गुण-तस्त्वयि। तैस्तैस्तस्य।

त्रयोविंशः पाठः

पर्वत-यात्रा

परीक्षायाः परिणामः मई मासे प्रकाशितो भवति। ततो द्वयोः मासयोः ग्रीष्मावकाशो भवति। स्वराज्यानन्तरं भारतं परिवर्तते इव। कुत्रचित् विशालाः जलाशयाः, कुत्रापि विशालानि कला-भवनानि, कुत्रापि गवेषणा स्थानानि कुत्रापि गगनचुम्बीनि राज्यभवानि, कृषि-भवनानि विज्ञान-भवनानि च।

एषां स्थानानां दर्शनाय, पर्वतानां च शोभायाः निभालनाय यात्राणां व्यवस्था क्रियते। छात्राणां संघाः सर्वेभ्यो भारतराज्येभ्य एतेषाम् अवलोकनाय सर्वत्र परिभ्रमन्ति।

अस्माकम् अपि ग्रीष्मावकाशः। पितृचरणाः अस्मान् काश्मीरान् अनयन्त। प्रस्थानात् पूर्वम् एकाम् दीर्घासूचि लिखिता। राडता अक्रियत। तस्यां सह-नीयमानानां सर्वेषां पदार्थानाम् विवरणं अलिख्यत।

चतसृषु मञ्जूषासु सर्वान् पदार्थान् अधराम। बहु भारः तासु अभवत्। न तासाम् उत्तोलनाय पराभवम्। सेवकः यथासमयं वाहनम् आनयत्। वयं च सर्वे तस्मिन् अतिष्ठाम। प्रसन्नाः च वाष्पयानस्य अवस्थानम् प्राचलाम।

अवस्थाने शौल्किकाय पितृचरणाः पंक्तौ अतिष्ठन् शान्त्या सानन्दं च शौल्किकम् अलभन्त। अत्रान्तरे वाष्पयानम् अपि आजगाम। तस्थौ च यथास्थानम्। वयम् अपि अन्यैः सह यथाक्रमं यानप्रकोष्ठम् आरोहाम। स्थानम् अपि शुभम् अनुगवाक्षम् अलभामहि। न अद्यत्वे वाष्पयाने जन-सम्मर्दो भवति। यतो हि समीपस्थानस्य यात्रिणः प्रायः आशुरथेन गच्छन्ति।

वयं यथासमयं पठानकोटम् प्राप्ताः। ततश्च आशुरथेन श्रीनगरम् अगच्छाम।

पर्वतेषु आशुरथस्य वाष्पयानस्य च आरोहणं अवरोहणं च चित्तं प्रसादयति। विचित्रा हि सुषमा काश्मीरदेशस्य। एकस्मिन् पार्श्वे उच्चानि हिमाच्छन्नानि हिमालयस्य शिखराणि। उपत्यकायाम् बहुरंगाणि पुष्पाणि, गगनचुम्बिनः शाल-तमाल वृक्षाः। एकत्र फलिनः फलारामाः, एकत्र केशरक्षेत्राणि सुवासयन्ति समस्तम् अपि स्थलम्। पाषाणखण्डेषु प्रस्रवणानि कलकलं कुर्वन्ति निर्मलसलिलानि प्रवहन्ति। विशालाः वैरीनागप्रभृतयः कासाराः, यत्र तत्र विहार-नौकाः नौगृहाणि शिकाराभिधानानि विहरन्ति। जलतले च मनोहारीणि लताभिः आच्छन्नानि चलानि क्षेत्रखण्डानि संतरन्ति। पर्वतीयाः जनाः च सरलाः सरलहृदयाः च, स्नेहस्य मूर्तयः आकर्षन्ति विदेशीयानाँ चित्तानि।

संसारे रम्यतमोऽयं देशः दर्शनीयो महनीयः च।
भारतस्य शिरोमणिरयम्। अविभाज्योऽयं भारतस्योत्तमाङ्गः॥

शब्दकोश :

जलाशयाः	=डैम, बान्ध	वाष्पयानम्	=रेल
निभालनाय	=देखने के लिए	शौल्किकः	=टिकिट
मञ्जूषासु	=सन्दूकों में	यानप्रकोष्ठः	=डिब्बा,
अनुगवाक्षम्	=खिड़की के पास	जन-सम्मर्दः	=भीड़-भाड़
उत्तोलनाय	=उठाने के लिये	विहारनौका	=शिकारे।

अभ्यास :

१ नीचे लिखे वाक्य अर्थ की दृष्टि से शुद्ध हैं तो उन के आगे साधु लिखो। यदि शुद्ध नहीं तो शुद्ध वाक्य क्या होना चाहिए, वह लिखो :—

पर्वतेषु आशुरथस्य वाष्पयानस्य च आरोहणं चित्तं प्रसादयति।
नीचैः खलु हिमाच्छन्नानि हिमालयस्य शिखराणि।

पाषाण–खण्डेषु प्रस्रवणानि कलकलं कुर्वन्ति ।
ह्रस्वाः वैरीनागप्रभृतयः कासाराः ।
पर्वतीया जना खलु कुटिल-हृदयाः ।

२ संशोधन करो । इन वाक्यों में विशेषणों में विशेष्य के अनुरूप विभक्ति, वचन और लिंग लगाना है । कर्ता के अनुरूप क्रिया का पुरुष और वचन रखना होता है :—

चतुर्षु मञ्जूपासु । सर्वं पदार्थान् ।
वाष्पयानम् आगतः । शुभः स्थानम् ।
वयमपि आरोहम् ।
पर्वतीयः जनः सरलहृदयाः ।
सेवकः वाहनम् आनयन् ।
एकं दीर्घं सूचिम् अलिखाम ।
बहुरंगणि पुष्पाणि ।

३ उपयुक्त विशेषण लगाओ :—

···वृक्षाः । ···भवनम् । ···अध्यापकः । ···अध्यापिका ।
गंगा··· । हिमालयः···। जलाशयाः··· । राज्यभवनानि··· ।

४ हिन्दी में अनुवाद करो :—

अवस्थाने पितृचरणाः पंक्तौ अतिष्ठन् ।
वाष्पयाने स्थानमपि शुभम्, अनुगवाक्षम् अलभामहि ।
उपत्यकायां बहुरंगाणि पुष्पाणि विकसन्ति ।
एकत्र फलिनः फलारामाः विराजन्ते ।

जलतले च मनोहराणि लताभिः आच्छन्नानि क्षेत्रखण्डानि सन्तरन्ति
पर्वतीया जनाः च सरलाः, सरलहृदयाः च ॥

स्नेहस्य मूर्तयः ते आकर्षन्ति विदेशीयानां चित्तानि ।

एषां स्थानानाम् दर्शनाय, पर्वतानां च शोभायाः निभालनाय यात्राणां व्यवस्थाद्यत्वे क्रियते ।

५ संस्कृत बनाओ :—

पाठशाला में गरमी की छुट्टियां हुईं ।

हम सब मित्र काश्मीर गए ।

पांच सन्दूकों में चीजें भरीं ।

प्रसन्न हो स्टेशन पर चले ।

अध्यापक महोदय पंक्ति में खड़े होकर शान्ति से टिकट ले आए ।

रेलगाड़ी भी आयी । हम सब गाड़ी में बैठ गए ।

ठीक समय पर श्रीनगर पहुंच गए ।

मोटर से आगे चले ।

हिमालय का दृश्य अतीव मनोरम था ।

जी चाहा वहीं रहें ।

चतुर्विंशः पाठः

वानरस्य-प्रतिशोधः

कस्मिंश्चिन् नगरे चन्द्रो नाम भूपतिर् उवास। तस्य पुत्राः वानर-क्रीडा-रताः। वानरयूथं नित्यम् एवानेक-भोजन-भक्ष्यादिभिः पोषयन्ति। वानरयूथाधिपस्तु औशनस-बार्हस्पत्य-चाणक्य-मतवेत्ता तदनुष्ठाता च। तान् सर्वान् अध्यापयाञ्चक्रे।

राजगृहे बालकुमार-वाहनयोग्यं मेषयूथं पर्यपाल्यत-तेषु एको जिह्वा-लौल्याद् महानसे प्रविश्य यत्पश्यति तत्सर्वं बुभुजे। ते च पाचका यत्-किञ्चित् काष्ठं, मृण्मयं भाजनं, कांस्यपात्रं वा लभन्ते तेन आशु ताडयन्ते।

स वानरयूथपस् तद् दृष्ट्वा चिन्तां प्रतिपेदे —'अहो ! पाचक-कलहोऽयं वानराणां नाशाय भविष्यति। यदि वस्तुनो ऽभावात् महाकोपाः पाचकाः उल्मुकेन मेषं ताडयिष्यन्ति तदा ऊर्णायाः प्राचुर्याद् मेषः स्वल्पेन अपि वह्निना प्रज्वलिष्यति। तदा दह्यमानः समीपस्थाम् अश्वशालां प्रवेक्ष्यति। सापि तृणबहुला। नूनं प्रज्व-लिष्यति। ततोऽश्वा अपि दग्धा भविष्यन्ति। वानर-वसया च अश्वानां वह्निदाह-दोषः शाम्यति। वसायै वानर-ध्वंसो निश्चितः। इति विचिन्त्य सर्वान् वानरान् रहसि आहूय ऊचे। "भोः वानराः! यावत् सर्वेषां वानराणां संक्षयो भवति तावत् राजगृहं परित्यज्य वनं गच्छामः।" मदोद्धताः वानराः प्रहस्योचिरे—"भोः। भवतो वृद्ध-भावाद् बुद्धि-वैकल्यं वर्त्तते, येन एवं ब्रूषे। न वयं स्वर्गोपमान् भोगान् राजपुत्रहस्तै दत्तान् अमृत-कल्पान् परित्यज्य वने कषाय-कटु-तिक्त-क्षार-रूक्षफलेभ्यः स्पृहयामः।"

वानरयूथपः प्रोवाच—रे रे मूर्खाः ! यूयमस्य सुखस्य परिणामं न जानीथ। अहं कुलक्षयं नावलोकयिष्यामि, अतः साम्प्रतं वनं गमिष्यामि। एवमभिधाय यूथाधिपोऽटव्यागतः।

अन्यस्मिन् अहनि यथा यूथपतिना तर्कितं तथा संवृत्तम्। यदा जाज्वल्यमानबालो मेषोऽश्वकुट्या प्रविवेश, भूमौ च लुलुटे, तदा सर्वत्र तृणेषु वह्निज्वालास् तथा समुत्थिताः यथा केचिद् अश्वाः पञ्चत्वं गताः। केचन अर्ध-दग्ध-शरीरा इतश्चेतश्च ह्रेषायमाणा जनसमूहम् आकुलीचक्रुः।

सविषादो राजा वैद्यानाहूय प्रोवाच—"भोः ! प्रोच्यताम् दाहोपशमनोपायः।

वैद्याः प्रोचुः—"दाहसमुद्भवो दोषो नश्यति कपीनां मेदसा।"

राजा—"तदेतच्चिकित्सितं शीघ्रं क्रियताम्। यावदेते अश्वाः दाहदोषेण न विनश्यन्ति।"

वैद्येन वानरवधमादिष्टम्। सर्वे च वानराः व्यापादिताः। सोऽपि वानर-यूथपः तच् छ्रुत्वा विषादम् उपगतः। अचिन्तयत् च—कथमहम् अस्य नृपापसदस्य अपकृत्यं कुर्वे !

एकदा वानरेण पिपासितेन एकं सरः समासादितम्। तत्र च दृष्टो वनचर मनुष्याणां पदपंक्ति-प्रवेशो न च तेषां निष्क्रमणम् इति। स जलान्ते दुष्ट-ग्राहं तर्कयाञ्चक्रे। ततः पद्मिनी-नालम् आदाय दूरस्थ एव जलम् अपिबत्।

तस्य चातुर्यमवलोक्य जलराक्षसो रत्नमाला-विभूषितः उवाच—"तुष्टोऽहं तव धौर्त्येन। प्रार्थयस्व हृदय-वाञ्छितम् !"

वानरः—"भोः ! कियती ते भक्षणशक्तिः ?"

जल-राक्षसः—"शत-सहस्र-युत-लक्षाणि अपि जलप्रविष्टानि भक्षयामि।"

वानरः—"अस्ति मे भूपतिना वैरम्। यदि रत्नमालां प्रयच्छसि तत् सपरिवारं तं भूपतिं लोभयित्वात्र प्रवेशयामि।"

राक्षसः—(मालां दत्त्वा) भो मित्र! यत् समुचितं तत् कर्त्तव्यम्। रत्नमालाविभूषितो वानरः प्रसाद-वृक्षेषु परिभ्रमन् जनैर् दृष्टः। राज्ञे च निवेदितं तस्यागमनम्। राज्ञा वानर आहूतः। पृष्टश्च अस्ति रत्नमाला सनाथं सरः क्वापि, यद् भवान् जनान् कथयति।'

वानरः—'कण्ठस्थया रत्नमालयाऽपि कुतो न ते विश्वासः। यदि रत्नमालया प्रयोजनम्, आगच्छ दर्शयामि।"

राजा—यद्येवं, सपरिजनः एष्यामि। येन प्रभूताः माला लभ्येरन्। तथानुष्ठिते, भूपतिना सह रत्नमालालोभेन सर्वे कलत्रभृत्याः प्रस्थिता-अथः तत्सरः समासाद्य वानरः राजानमुवाचदेव! अर्धोदिते सूर्येऽत्र प्रविष्टानां सिद्धिर्भवति। सर्वो ऽपिजन एकदैव प्रविशतु। त्वया पुनर्मया सह पवेष्टव्यम्" प्रविष्टास्ते लोकः सर्वे भक्षिता राक्षसेन। वानरः सत्वरं वृक्षमारुह्य राजानमुवाच - "दुष्ट नरपते! राक्षसेन अन्तःसलिलं भक्षितः ते परिजनः। साधितं मया कुलक्षयजं वैरम्। तद् गम्यताम्। त्वया मम कुलक्षयः कृतः, मया पुनस्तव। राजा सविषादं गृहमगमत्। भूपतौ गते राक्षसः सानन्द-माह-अहोवानरराज!

हतः शत्रुः कृतं मित्रम् रत्न-माला च हारिता
नालेन पिबता तोयं भवता साधु वानर॥

शब्दकोश :

यूथपः, यूथाधिपः	=सरदार, झुण्ड का पालकः	महानसः	=रसोई
		उल्मुकः	=जलती लकड़ी, मशाल
वसा, मेदः	=चर्बी	कषायः	=कसैला
ह्रेषायमाणः	=हिनहिनाता हुआ	अपसदः	=नीच।

अभ्यास :

१ बन्दर ने जिस नीति से प्रतिशोध लिया वह उचित है या अनुचित ? कारण दो ।

२ संस्कृत में उत्तर दो :—

(१) के खलु औशनस-बृहस्पति-चाणक्याः ? कथं च तेषाम् मतस्य ज्ञानम् ?

(२) राजगृहे मेषयूथस्य किं कार्यम्, किञ्चाकार्यम् अभूत् ।

(३) वानरयूथपस्य का चिन्ता जाता ?

(४) मदोद्धताः वानराः यूथपविषये किमचिन्तयन् ?

(५) कतमः खलु दाह-शमनोपायो राज्ञाऽऽज्ञप्तः ?

(६) अद्यत्वे के कदा नालिकया तोयं पिबन्ति ? कस्यानुकृतिरेषा?

३ राजा 'चन्द्र' किस दोष से मारा गया, घटना-सहित लिखो ।

४ निम्नलिखित शब्दों के अर्थ लिखकर संस्कृत में वाक्य बनाओ—
पोषयन्ति, ताड्यन्ते, पाचकः, आहूय, बुद्धि-वैकल्यम् ।

५ निम्न शब्दों का अर्थ लिखकर कृदन्त प्रत्यय बताओ —

प्रविश्य, दह्यमानः, दग्धः, परित्यज्य, प्रहस्य, दत्तः, अभिधाय, तर्कितम्, समुत्थितः, ह्रेषायमाणः, आहूय, आदिष्टम्, व्यापादितः उपगतः, आसादितम्, विभूषितः, परिभ्रमन्, उदितः, प्रविष्टः, पिबन् ।

पञ्चविंशः पाठः

समुद्रटिट्टिभयोः कलहः

कस्मिंश्चित् समुद्र तीरैकदेशे टिट्टिभदम्पती वसतः स्म । ततो गच्छति काले टिट्टिभी गर्भमाधत्त ।

आसन्न-प्रसवा सा टिट्टिभम् ऊचे—"भोः कान्त! प्रसवसमयो वर्त्तते। तद् विचिन्त्यतां किमपि निरुपद्रवं स्थानम् यत्राहम् अण्डक-विमोक्षणं कुर्वे ।"

टिट्टिभः प्राह—'भद्रे ! रम्योऽयं समुद्र-प्रदेशः । तद् अत्रैव प्रसवः क्रियताम् ।"

टिट्टिभी प्राह—',अत्र पूर्णिमायां समुद्रवेला चरति । सा मत्तगजेन्द्रान् अप्याकर्षति । तद् दूरम् अन्यत्र किञ्चित् स्थानम् अन्विष्यताम् ।"

टिट्टिभो विहस्य प्राहः—"न युक्तम् उक्तं भवत्या । का मात्रा समुद्रस्य यः मम प्रसूतिं दूषयिष्यते । विश्रब्धा अत्रैव अण्डकं मुञ्च ।"

तच्छ्रुत्वा समुद्रः चिन्तयांचक्रे—अहो गर्वः पक्षिकीटस्य ! अस्तु । मयास्य प्रमाणं कुतूहलादपि द्रष्टव्यम् । अण्डापहारे कृते किमेषः करिष्यते इति ।'

अथ प्रसवानन्तरं प्राणयात्रार्थं गतायाः टिट्टिभ्याः समुद्रो वेला-व्याजेन अण्डानि अपजहार । आयाता सा टिट्टिभी प्रसव-स्थानम् शून्यम् अवालोकयत् ।

प्रलपन्ती सा टिट्टिभमूचे—"भो मूर्ख ! कथितम् आसीन्मया—"समुद्रवेलया अण्डानां विनाशो भविष्यति' इति । परं मूढतया अहंकारम् आश्रित्य मम वचनं न चक्रुषे ।"

टिट्टिभः आह—'भद्रे ! किं मां मूढं सम्भावयसे । तत् पश्य मे बुद्धि-प्रभावम् । एनं दुष्ट-समुद्रं चञ्च्वा शोषयामः ।

टिट्टिभी आह—'अस्तु ! कस्ते समुद्रेण सह विग्रहः ? तन्न युक्तम् अस्योपरि कोपं कर्तुम् । आत्मनः परस्य च शक्तिम् अविदित्वा, शत्रोर् अभिमुखं गच्छन् तथा नाशं याति यथा वह्नौ पतङ्गः ।'

टिट्टिभ आह—'प्रिये ! मा मा एवं वद । येषाम् उत्साह-शक्ति र्भवति ते स्वल्पा अपि गुरून् विक्रमन्ते । पश्य ! हस्ती स्थूलतरः, सः चाङ्कुशवशः । दीपे प्रज्वलिते प्रणश्यति तमः । तेजो यस्य विराजते स बलवान् । स्थूलेषु कः प्रत्ययः । तत् पश्य ! अनया चञ्च्वा अस्य सकलं जलं शुष्क-स्थलतां नयामि ।'

टिट्टिभी आह—'भोः कान्त ! अत्र जाह्नवी नदनदीशतानि गृहीत्वा नित्यमेव प्रविशति, तथैव सिन्धुश्च । तत्कथं त्वम् अष्टादशनदीशतैः पूर्यमाणं समुद्रमेनं विन्दुवाहिन्या चञ्च्वा शोषयिष्यसे ?

टिट्टिभः प्राह—'प्रिये ! चञ्चुः मे लोह-सन्निभा । अहोरात्राणि च दीर्घाणि । समुद्रः किं न शुष्यति ?

टिट्टिभ्याह—'यदि त्वया अवश्यं समुद्रेण सह विग्रहः कार्यः, तद् अन्यान् अपि पक्षिण आहूय सुहृज्जनसहित एवं समाचर ।'

टिट्टिभः प्राह—'भद्रे ! एवं भवतु । सुहृद्-वर्ग-समुदायेन समुद्रं निश्चयमेव शोषयिष्यामि ।"

एवं निश्चित्य बक-सारस-मयूरादीन् समाहूय प्रोवाच—'भोः ! पराभूतोहम् समुद्रेण अण्डकापहारेण । तत् चिन्त्यताम् अस्य शोषणोपायः ।'

ते सम्मन्त्र्य प्रोचुः—"अशक्ता वयं समुद्रशोषणे ।" तद् अस्माकं स्वामी वैनतेयो अस्ति । तस्मै सर्वमेतत् परिभववृत्तान्तं निवेद्यताम् । येन स्वजाति-परिभव-कुपितो वैरनिर्यातनं कुर्यात् । तद् यामो वैनतेय-सकाशम् ।"

तथानुष्ठिते सर्वे पक्षिणः विषण्ण-वदनाः वाष्पाकुलेक्षणाः वैनतेय-सकाशम् आगत्य करुणस्वरेण निवेदयाञ्चक्रिरे—'अहो ! अब्रह्मण्यम् । अब्रह्मण्यम् सदारस्य टिट्टिभस्य भवति नाथे सति समुद्रेण अण्डान्यपहृतानि । प्रनष्टम् अधुना पक्षिकुलम् । अन्येऽपि स्वेच्छया समुद्रेण व्यापादयिष्यन्ते ।'

अथैवं गरुडः समाकर्ण्य तद्-दुःखदुखितः कोपाविष्टः चिन्तयाञ्चक्रे—'सत्यम् उक्तम् एतैः पक्षिभिः । तद् अद्य गत्वा तं समुद्रं शोषयामः ।'

एवं चिन्तयतस् तस्य विष्णुदूतः समागतः, प्रोवाच ।

दूतः—'भोः ! गरुत्मन् ! भगवता नारायणेन अहं तव पार्श्वे प्रेषितः । देव-कार्याय भगवान् अमरावत्यां यास्यति, तत् सत्वरम् आगम्यताम् ।'

तच् छ्रुत्वा गरुडः साभिमानं प्राह—भो दूत ! किं मया कुभृत्येन भगवान् करिष्यति । तद् गत्वा तं वद यदन्यो भृत्यो वाहनाय क्रियताम् । मदीयो नमस्कारो वाच्यो भगवतः ।'

दूत आह—'भो वैनतेय ! कदाचिदपि भगवन्तं प्रति न त्वया अभिहितम् इदृक् तत्कथय ! किं भगवता तेऽपमानं कृतम् ?'

गरुड आह—'भगवदाश्रयभूतेन समुद्रेण अस्म-टिट्टिभाण्डानि अपहृतानि । तद् यदि तस्य निग्रहं न करोति तदहं भगवतो न भृत्य इति मे निश्चयस् त्वया वाच्यः । तद् द्रुततरं गच्छ ।'

अथ दूतमुखेन प्रणयकुपितं वैनतेयं विज्ञाय भगवांश्चिन्तयामास—'अहो ! स्थाने कोपो वैनतेयस्य । तत्स्वयमेव गत्वा ससम्मानं तमानयामि ।' इत्येवं संप्रधार्य स वैनतेय-सकाशं सत्वरम् अगमत् ।

वैनतेयः—(त्रपाधोमुखः प्रणम्य उवाच)—भगवन् ! त्वदाश्रयोन्मत्तेन समुद्रेण मम भृत्यस्य अण्डान्यपहृतानि । अपहृत्य च ममापमानं विहितम् ।'

तच् श्रुत्वा भगवान् आह—'भोः ! वैनतेय सत्यम् अभिहितं भवता । तद् आगच्छ ! येन अण्डानि समुद्रादादाय टिट्टिभं संभावयावः ।'

तथा अनुष्ठिते भगवता शरं सन्धाय समुद्रोऽभिहितः—भो दुरात्मन् दीयतां टिट्टिभाण्डानि । नो चेत् स्थलतां त्वां नयामि ।'

ततः समुद्रेण सभयेन टिट्टिभाण्डानि दत्तानि । टिट्टिभेनापि भार्यायै समर्पितानि ।

शब्दकोशः

टिट्टिभः	=टिटीहरा	दम्पती	=पति पत्नी
आधत्त	=धारण किया आ+धा लुङ्	आसन्नं	=समीप (आ+सद्+क्त)
		विचिन्त्यताम्	=सोचा विचारा जाये (वि+चित+यक्+लोट्)
समुद्र-वेला	=ससुद्र की झाल		
मात्रा	=परिमाण, मजाल, औकात	विश्रब्धा	=विश्वस्त होकर (वि=श्रभ्+क्त+आ)
चक्रुषे	=किया (कृ+लिट्,से)	विक्रमन्ते	=विक्रम दिखाते हैं
वैर–निर्यातनम्	=वैर का वदला	विषण्ण	=उदास, दुःखी (वि+षद्+क्त)
गरुत्मन्	=गरुड,		
प्रणय	=प्रेम से	संभावयाव:	=आदर करें ।

अभ्यास:

१ समुद्र और टटीहरी का विरोध किस कारण ठना ? तथा इस विरोध में टटीहरी की विजय किस कारण हुई ?

२ निम्न वाक्यांशों का अर्थ करो —

स्थूलेषु कः प्रत्ययः ? अहो गर्वः पक्षिकीटस्य ! पश्य मे बुद्धि-प्रभावम् । तथा नाशं याति यथा वह्नौ पतङ्गः । तेजो यस्य विराजते स बलवान् । विन्दुवाहिनी चञ्चुः । किं मया कुभृत्येन ?

३ सन्धिच्छेद करो और सन्धि का नाम भी बताओ :—

कस्मिंश्चित्, तच्छ्रुत्वा, अत्रैव, अस्योपरि, सिन्धुश्च, तद्यामो वयम्, तेऽपमानम्, भगवांश्चिन्तयामास ।

४ संस्कृत में उत्तर दो :—

(क) टिट्टिभ=दम्पती क्व वसतः स्म ?

(ख) टिट्टिभस्य का ऽत्र गर्वोक्तिः ?

(ग) का च टिट्टिभस्य उत्साहपूर्णा उक्तिः ?

(घ) पक्षिणः गरुडस्य सकाशं किमर्थं गताः ?

(ङ) भगवता विष्णुना समुद्रस्योपरि शरसन्धानं किमर्थं कृतम् ?

षड्विंश पाठः

निबन्ध-लेखनम्

प्रथम-कक्षातः एव यूयम् हिन्दी-भाषायां प्रस्ताव-लेखनम् कुर्वन्तः परीक्षासु कक्षायां दत्तेषु गृहकार्येषु वा स्वकीयान् भावान् विचारान् च प्रकाशयत । संस्कृतमधीत्य अधुना संस्कृतेनापि तथैव प्रकाशन-सामर्थ्यं युष्माकं भवेदिति मनसि कृत्वा तस्योपायोऽत्र प्रस्तूयते ।

कापि भाषा स्यात् सा तु वक्तुर् अलङ्करणं तदैव भवितुम् अर्हति यदा तस्या अभ्यासो दैनन्दिने वार्तालापे क्रियेत । संस्कृतस्य प्रयोगोऽपि यथावसरं स्व-व्यवहारेषु करणीय इति सर्वप्रथमः उपायः । अनेन युष्माकं विचाराणाम् अभिव्यक्तिसाधनं केवलं मातृभाषया एव न भूत्वा संस्कृतेन अपि भवितुम् अर्हति ।

यावच्च ईदृशो अभ्यासः न भवति तावत् द्वितीयः उपायः प्रयोज्यः। स्वभाषायां विचार्य प्रस्तावस्य रूपरेखा संस्कृतेन निर्धारणीया। उदाहरणार्थम्—'कृषकः' इति विषयम् अधिकृत्य यदि प्रस्तावो लेखनीयश्चेत्, तर्हि कृषक-सम्बद्धान् विचारान् यथाध्यानं यथा यथा च ते मनसि उत्पद्यन्ते तथा तथैव लिखित—

कर्म—कृषिः, राष्ट्राय महत्त्वपूर्णम्,

वासः—ग्रामे, सारल्येन,

जीवनम्—कठिनम्, निद्रापि न लभ्यते,

महत्त्वम्—राष्ट्रस्य किं, मानवमात्रस्य प्राणदाता, लालबहादुरः शास्त्री 'कृषकाणां 'जय' इति मन्त्रो दत्तस्तेन।

भारतस्य वैशिष्ट्यम्—कृषि-प्रधानः अस्माकं देशः।

कृषकं प्रति अस्माकं दायित्वम्—तस्य सम्मानं, उचितं च मूल्यं तस्मै देयम्, तस्य उपकरणानि, उर्वरकादिकं च यथासमयं स लभेत।

कृषकस्य दायित्वम्—न संग्रहं करोतु धान्यस्य, न च धनेशानां कृते न वा स्वयमेव।

कृषक-जीवनस्य गुणाः—परिश्रमेण स्वास्थ्य-लाभः, मानवोपयोगिनि उत्पादने अग्रेसरत्वम्।

दोषाः—कष्ट-बाहुल्यं, शिक्षाया अभावः, ज्ञानस्य महत्त्वाभावः, निरक्षरोऽपि कृषकः धनी सुखी च स्यात्, साक्षरोऽपि निर्धनः दुःखार्त्तश्च।

अधुना किञ्चित् विमृश्य क्रमोऽस्य निश्चितः कर्तव्यः। एतेषु विचार-विन्दुषु किञ्चित् तारतम्यं न प्रतीयते। तदर्थं 'भारतस्य वैशिष्ट्यम्' इत्येष विन्दुः प्रस्तावस्य भूमिकारूपेण साधीयान् स्यात्। 'महत्त्वम्' इति च उपसंहार-रूपेण निवेशितः शोभाकरो भविष्यति। प्रस्तावस्य

शरीरे च प्रथमतः 'कृषकस्य जीवनम्' वर्णयित्वा तस्य 'वासस्य:' कर्मणश्च उल्लेख: तम् अनुगतः एव, पूर्वापेक्षया च उद्भूत: इव ज्ञायेत । कृषक-जीवनस्य चर्चया स्‌ व 'तस्य गुणा:' 'दोषा:' च दर्शिता: स्थानगता: स्यु: । तदनु 'कृषकस्य दायित्वम्' 'अस्माकं च दायित्वं' विवेचनीयम् भवति ।

इत्थं विचार-विन्दूनां तारतम्यं विमृश्य तेषां उचिततम: क्रम: लेखनीय: । उल्लिखितस्य विषयस्य क्रम: एवं भवति :—

कृषकः

१. भारते कृषक-वैशिष्ट्यम्
२. कृषक-जीवनम्
३. वासः
४. कर्म
५. कृषक-जीवनस्य गुणाः
६. कृषक-जीवनस्य दोषाः
७. कृषकदायित्वम्
८. कृषकं प्रति अस्माकं दायित्वम्
९. कृषकस्य महत्त्वम्

न तावत् एकः एव क्रमः, सदृशा: एव वा विचार-विन्दव सर्वत्र भवन्ति । अन्यः कश्चित् लिखति चेद् अन्यथा एव लिखेत् इति तु निश्चितमेव ।

प्रस्तावस्य विचार-क्रम-निर्णये जाते, यदि विन्दुना एकेनापि अनुच्छेद: एकः लिख्येत द्वे त्रीणि वा वाक्यानि लिख्येरन् पर्याप्ता सामग्री स्यात् । यथा-यथा च अनुच्छेदा: लिखिष्यन्ते तथा तथा अन्येऽपि तत्सम्बद्धा:-भावा बुद्धौ प्रतिभास्यन्ते । तान् सुनिबद्धान् कर्तुं प्रयतध्वम् । सुनिश्चितं सुलेखका भवेयुः ।

शब्दकोशः

प्रस्तूयते =सामने रखा जाता है
उपकरण =साधन
अग्रेसरत्वम् =अग्रणी या मुखिया होना
तारतम्यम् =एकतानता, क्रम वद्धता, परस्पर सम्वन्ध
दैनन्दिन =प्रतिदिन का
उर्वरकः =खाद
विमृश्य =विचार-विमर्श करके
स्थानगतः =अपने उपयुक्त स्थान पर आया हुआ
प्रतिभास्यन्ते—प्रकाशित होंगे ।

अभ्यास :

१ इस पाठ में दिये विन्दुओं के अनुसार 'कृषकः' विषय पर एक १५ वाक्यों का निवन्ध लिखो ।

२ इस पाठ में सुझाये दूसरे उपाय के अनुसार नीचे लिखे विषयों के विचार-विन्दु वनाओ :—

(क) सैनिकः (ख) विद्यालयः (ग) गौः

३ नीचे कुछ वाक्य संकेत रूप से दिये जा रहे हैं। इनके आधार पर एक निबन्ध लिखो और उसका शीर्षक भी स्वयं दो :—

नीतिविद्भिः जीवनकालः चतुर्षु भागेषु विभक्तः। ··· तेषु ब्रह्मचर्यस्य विशिष्टं महत्वम्। ··· अयं कालः चिन्ता रहितः विद्यार्जनप्रधानः। ··· प्राक् विद्यार्थिनः गुरुकुले अतिष्ठन्। ···अद्यत्वे भिन्ना स्कूलशिक्षा परिपाटी। ··· गुरुजनैः सह भिन्नः शिष्यानां सम्वन्धः। ··· उच्येत 'सुखार्थिनः कुतो विद्या।' विद्या लाभ एव विद्यार्थिनां परमं कर्तव्यम्। ······

४ इस 'संस्कृत दीपिका' में तुम ने कुछ ऐसे पाठ पढ़े हैं जिनके आधार पर तुम निम्नलिखित विषयों पर प्रस्ताव लिख सकते हो। उन्हें देख कर अपने शब्दों में १०—१५ वाक्य लिखो।

(क) पर्वत यात्रा (ग) भारतीयं गौरवं (घ) गणतन्त्र दिवसः

५ नीचे १०--११ वाक्यों के द्वारा दो प्रस्तावों के लिए विस्तृत संकेत दिये जा रहे हैं। इन्हें निबन्ध-रूप में १५—२० वाक्यों में सुनिबद्ध करके लिखो :—

प्रथमः—'शठे शाठ्यं समाचरेत्'

१ यो जनः परस्य अपकारं हानिं वा करोति, स 'शठ' इत्युच्यते।

२ एतादृशाः पुरुषाः समाजस्य हानिं कुर्वन्ति, देशस्य उन्नति-मार्गे बाधामुपस्थापयन्ति।

३ अत एतादृशानां पुरुषाणां नियन्त्रणं दण्डनं च आवश्यकमस्ति।

४ जीर्णधनो नाम वणिक् पुत्रः श्रेष्ठिना सह शठतां आचरत् तथैवं श्रेष्ठिना शिक्षा प्राप्ता।

५ 'शठे शठ्यं समाचरेत्' इमां नीतिमेव स्वीकृत्य रामः पापिनो रावणस्य वधमकरोत्।

६ एषाः नीति शठेष्वेव प्रयोज्या, न तु सज्जनेषु।

७ ये सज्जनाः सन्ति तैः सह सद्भावपूर्वकमेव व्यवहरणीयम्।

८ अतो मनुष्यैः स्वकल्याणाय शठेषु शठतापूर्ण एव व्यवहारः कार्यः, सज्जनेषु च सज्जनतापूर्णः।

९ एषैव नीतिविदां संमतिरस्ति।

१० उक्तं च कालिदासेन 'शाम्येत् प्रत्यपकारेश नोपकारेण दुर्जनः।'

द्वितीयः—'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'

१ अस्मिन् संसारे माता मातृभूमिश्च सर्वप्रथमं बालकस्य सम्मुखे समुपस्थितौ भवतः।

२ माता बालकस्य कृते सर्वस्वमपि त्यक्तुं शक्नोति।

३ माता सर्वदैव इच्छति यद् बालकः सदा सुखी समृद्धश्च भवेत्।

४ अतएव पुत्रस्यापि मातरि नैसर्गिकमसाधरणं प्रेम भवति।

५ यो मनुष्यो यत्र जन्म लभते, सा तस्य जन्मभूमिः।

६ जन्म भूमिः मनुष्यस्य सर्वदैव आदरयोग्या भवति ।

७ भारतवर्ष मिदमस्माकं जन्मभूमिः देशश्च ।

८ स्वदेशं प्रति सर्वेषां हृदये सम्मान् आदरश्च भवति ।

९ देशस्य प्रगत्यै देशभक्तिभावनाया महत्यावश्यकता ।

१० भारतीयेषु स्वदेशाभिमानः सर्वदा आसीत्, अस्ति च ।

११ अस्माभिर् अपि देशभक्तैः भाव्यम् देशस्य चोन्नतिः करणीया
लक्ष्यं च भवेत् एतद्देशप्रसूतस्य सकाशादग्रजन्मना ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥

सप्तविंशः पाठः

सूक्तयः

अच्छलो हि स्नेहो नाम ।

अतनुषु विभवेषु ज्ञातयः सन्तु नाम ।

अनुहुङ्कुरुते घनध्वनिं न तु गोमायुरुतानि केसरी ।

अन्विष्यते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ।

अर्थी दोषं न पश्यति ।

अर्धो घटो घोषमुपैति नूनम् ।

अल्पविद्यो महागर्वी ।

आज्ञा गुरूणां ह्यविचारणीया ।

आत्मवर्गहितमिच्छति सर्वः ।

आदानं हि विसर्गाय सतां वारिमुचामिव ।
इतो व्याघ्र इतस्तटी ।
उत्तीर्णे च परे पारे नौकायाः किं प्रयोजनम् ?
एकेन सन्धिः कलहोऽपरेण ।
कष्टमया मनुष्याः ।
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ।
क्रोधप्रायं वयो जीर्णम् ।
क्षमा हि मूलं सर्वतपसाम् ।
गुणवान् रक्षितव्यो भवति ।
चन्दनप्रभवो न दहति किमनलः ?
छिद्रेष्वनर्था बहुलीभवन्ति ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ।
जयो रन्ध्रप्रहारिणाम् ।
तेजसां हि न वयः समीक्ष्यते ।
दर्दुरा व्याहरन्तीति किं देवः पृथिव्यां वर्षितुं विरमति ?
दानेन पाणिर्न तु कङ्कणेन ।
दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते ।
दीर्घसूत्री विनश्यति ।
दैवमविद्वांसः प्रमाणयन्ति ।
दैवो दुर्बल-घातकः ।
धीरा हि तरन्त्यापदम् ।
न कस्यापि हि तत् कार्यं कार्यं सर्वस्य यद् भवेत् ।
न केवलं यो महतोऽपभाषते, शृणोति तस्मादपि यः स पापभाक् ।
न चन्द्रादातपो भवति ।
न नश्यति तमो नाम कृतया दीपवार्तया ।
ननु सर्वस्याभ्यागतो गुरुः ।

न महानिच्छति भूतिमन्यतः।
न मृषा श्रान्तं यद् अवन्ति देवाः।
न रत्नमन्विष्यति मृग्यते हि तत्।
न वित्तेन तर्पणीयो मनुष्यः।
न विस्ताहृणि विप्रियाणि।
न हि सर्वः सर्वं जानाति।
निर्धनता सर्वापदाम् आस्पदम्।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते।
न्यायाधारा हि साधवः।
परोपकाराय सतां विभूतयः।
परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम्।
पुत्रापेक्षीणि खलु पितृहृदयानि।
प्रभुप्रसादो हि मुदे न कस्य ?
प्रायेण नीचा व्यसने निमग्ना निन्दन्ति दैवं कुकृतं न तु स्वम्।
प्रारब्धमुत्तमगुणा न परित्यजन्ति।
बलवता सह को विरोधः ?
बहुभाषिणे न श्रद्दधाति लोकः।
बहुविघ्नानि सुखानि।
बुद्धेः फलम् अनाग्रहः।
भव्यं रक्षति भवितव्यता।
भाग्यक्रमेण हि धनानि भवन्ति यान्ति।
भिन्नरुचिर्हि लोकः।
मत्स्य एव मत्स्यं गिलति।
मनोरथानाम् अगतिर्न विद्यते।
महद् अपि परदुःखं शीतलं सम्यग् आहुः।
माता किल मनुष्याणां दैवतानां च दैवतम्।
मुखरताऽवसरे हि विराजते।

मुहूर्तं ज्वलितं श्रेयो न तु धूमायितं चिरम् ।
मूढः परप्रत्ययनेयबुद्धिः ।
मूले छिन्ने कुतः पादपस्य पालनम् ?
मेरुं न कम्पयति वायसपक्षपातः ।
यः प्रीणयेत् सुचरितैः पितरं स पुत्रः ।
यदेवोपनतं दुःखात् सुखं तद् रसवत्तरम् ।
यस्यास्ति वित्तं स नरः कुलीनः ।
याचनान्तं हि गौरवम् ।
रत्नाकरे युज्यत एव रत्नम् ।
लघुजनस्य सुलभो विस्मयः ।
वक्तव्यं परिहर्तव्यम् ।
वस्तुमिच्छति निरापदि सर्वः ।
विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः ।
विक्रीते करिणि किम् अङ्कुशे विवादः ?
विनाशकाले विपरीतबुद्धिः ।
विपदि हन्त सुधापि विषायते ।
विपद् विपदं सम्पत् सम्पदम् अनुबध्नाति ।
विभूषणं मौनमपण्डितानाम् ।
शत्रोरपि गुणा वाच्या दोषा वाच्या गुरोरपि ।
शरीरमाद्यं खलु धर्मसाधनम् ।
शाम्येत प्रत्यपकारेण नोपकारेण दुर्जनः ।
सङ्घ-चारिणोऽनर्थाः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला ।
सत्यमेव जयते नानृतम् ।
सत्सङ्गतिः कथय किं न करोति पुंसाम् ?
सदृशाः सदृशेषु रज्यन्ते
सम्भावितस्य चाकीर्तिर् मरणाद् अतिरिच्यते ।
सर्वस्यौषधमस्ति शास्त्रविहितं, मूर्खस्य नास्त्यौषधम् ।

सर्वो हि मन्त्यते लोक आत्मानं बुद्धिमत्तरम् ।

साहसे खलु श्रीर्वसति ।

सुखं हि दुःखान्यनुभूय शोभते ।

सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम् ।

सुदुर्लभाः सर्वमनोरमा गिरः ।

स्तोत्रं कस्य न तुष्टये ?

स्वके गेहे कुक्कुरोऽपि तावच्चण्डो भवति ।

स्वभावो दुरतिक्रमः ।

हितं मनोहारि च दुर्लभं वचः ।

हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ।

शब्दकोश :

अतनु	=विशाल	गोमायुरुतम्	=गीदड़ का शब्द
क्रमेलकः	=ऊंट	वारिमुक्	=बादल
तटी	=नदी	रन्ध्र	=दुर्बल स्थल
दर्दुराः	=मेंढक	दीर्घसूत्री	=धीरे धीरे काम करने वाला, देर तक सोचमें पड़े रहने वाला
अपभाष्	=बुराई करना		
मृषा	=झूठ		
अव्	=रक्षा करना		
आस्पदम्	=घर, स्थान	निरस्त	=रहित
प्रत्यय	=विश्वास, आस्था	विस्मयः	=गर्व, आश्चर्य
अतिरिच्	=बढ़कर होना	वक्तव्यम्	=निन्दा के योग्य बात
परिहर्तव्यम्	=दूर रखनी चाहिए	वस्तुम्	=(वस्+तुम्) बसने के लिए ।
निरापद्	=आपत्ति रहित ।		

अभ्यास :

१ इस पाठ की सूक्तियों में से आगे लिखे विषयों से सम्बद्ध सूक्तियाँ छांटो—

भाग्य, धन, निर्धनता, विपत्ति, मूर्ख, वाणी ।

२ इस पाठ की सूक्तियों में से जिन के भावार्थ निम्नलिखित उक्तियों से मिलते हैं, उन्हें लिखो और कण्ठाग्र करो :—

(क) अधजल गगरी छलकत जाए।

(ख) इधर कुंआ उधर खाई।

(ग) क्या पूरा हो पाता है वह काम सभी का जो कहलाए ?

(घ) गुड़ गुड़ कहने से कहीं मुँह मीठा होता है ?

(ङ) नहीं झूठ यह देव सदा ही रक्षा करते परिश्रमी की।

(च) कहि रहीम परकाज हित सम्पति संचहि सुजान।

(छ) पर-उपदेश-कुशल वहुतेरे।

(ज) वकवादी का क्या विश्वास ?

(झ) वड़े से वड़े भूकम्प या युद्ध के समाचार से भी अधिक दुःख अपनी डाढ़ के दर्द के कारण होता है।

(ञ) नीकी पै फीकी लागे वे-औसुर की बात।

(ट) मांगे मान घटे जग मांहि।

(ठ) हाथी निकल गया दुम रह गई मगर।

(ड) आपत्तियाँ अकेली नहीं आतीं।

(ढ) विना कष्ट झेले विद्या--प्राप्ति कहाँ होती है ?

(ण) अपनी गली में कुत्ता भी शेर होता है।

३ 'मानव के अपेक्षित गुण' क्या क्या होने चाहिए ? इस पाठ की सूक्तियों के आधार पर लिखिये।

४ इस पाठ की—अन्विष्यते०, अर्धो घटो०…, उत्तीर्णे च०…, कूपे पस्य० …, चन्दन प्रभवो…, दर्दुरा व्याहरन्तीति …, न नश्यति तमो …, न रत्नम०…, निरस्तपादपे …, मत्स्य एव …, मुहूर्त …, मूले

छिन्ने···, रत्नाकरे···, विक्रीते करिणि···, स्वके गेहे ···, हेम्नः संलक्ष्यते··· ।

इन सूक्तियों का भावार्थ स्पष्ट करते हुए व्याख्या करो। उदाहरण के लिए—

—'अनुहुङ्कुरुते घनध्वनिं न तु गोमायुरुतानि केसरी।'

अर्थ—'सिंह मेघगर्जन के प्रत्युत्तर में तो अवश्य हुंकार भरता है किन्तु गीदड़ों के रोने पर नहीं गरजा करता।'

भाव—'महान् व्यक्ति अपनी शक्ति और सामर्थ्य के अनुरूप ही कार्य करता है। वह क्षुद्र बातों की ओर ध्यान नहीं देता।

व्याख्या—'इस सूक्ति के द्वारा कवि ने महान् व्यक्ति की उदात्तता का संकेत किया है। व्यक्ति का यथायोग्य कार्य करना ही अच्छा लगता है। साथ ही, अपने से दुर्बल व्यक्ति पर शक्ति-प्रदर्शन करना महानता न होकर नीचता है।'

अष्टाविंशः पाठः

विज्ञप्तयः

२. राजस्थाने संस्कृत-विश्वविद्यालय-स्थापना

राजस्थान-संस्कृत-साहित्य-सम्मेलन-तत्वावधाने तत्र विशालम् एकं संस्कृतसम्मेलनम् अभूत् । सम्मेलने राजस्थान-शिक्षामन्त्रिणा कथितं यत् संस्कृतस्य काम् अपि सेवां कृत्वा राजस्थान-सर्वकारः स्वात्मानं धन्यं मन्यते । यतो हि संस्कृतं भारतीय-ज्ञानस्य विद्यानां च जननी ।

सम्मेलनस्य विशिष्टातिथयः अखिल-भारतीय-संस्कृत-साहित्य-सम्मेलनस्य महामन्त्रिणः डाक्टर-श्री मण्डनमिश्र-महाभागाः राजस्थान-सर्वकारम् पूर्वनिर्धारितस्य संस्कृतविश्वविद्यालयस्य शीघ्रमेव स्थापनार्थं साग्रहम् उक्तवन्तः । आशास्यते यत् तत्र न चिराद् एव संस्कृत-विश्वविद्यालयस्य स्थापना भवेत् ।

१. "वियतनामे युद्धं रुद्धं भवतु"

वियतनामे अद्य नरसंहारो नृत्यति । संग्रामो अयं शीघ्रं शाम्यतु । युद्धावरोधाय सर्वैः देशैः प्रयतितव्यम् । सर्वैः राष्ट्रैर् युद्धावरोधस्य उत्तरदायित्वम् अङ्गीकार्यम् । सद्यः घटिताभिः घटनाभिः युद्धाग्नेः संसारस्य अन्यभागेषु अपि प्रसरणस्य आशङ्का सर्वत्र बद्धमूला जाता । युद्धैर्वियतनामस्य समस्या कदापि समाहिता न भविष्यति । शान्तेः सन्धेः च अतिरिक्तो न कोऽपि पन्थाः विलोक्यते । जिनेवा-शान्ति-प्रस्तावानुसारं समस्यायाः समाधानाय अस्माभिः प्रयतनीयम् ।

३. गुरुकुल कांगड़ी विश्वविद्यालयस्य संस्कृत-विभागः

इतः षट्षष्टिवर्षपूर्वं १९०० तमे खिष्टाब्दे हरिद्वारे श्रीस्वामिश्रद्धानन्दमहाभागैः गुरुकुलकांगड़ी-विश्वविद्यालयः स्थापितः। आदिकालादेव गुरुकुलस्य मूललक्ष्येषु वेदवेदाङ्गस्मृत्यादिभिः अलंकृतस्य वाल्मीकि-व्यासकालिदासप्रभृतिभिः कविवरैः उपासितस्य परमगौरवान्वितस्य संस्कृतसाहित्यस्य अध्ययनाध्यापनप्रसारादि मुख्यतमम् आसीत्। तदनुरूपं गुरुकुलस्य पाठ्यक्रमेऽपि आधुनिकविषयैः सार्धं संस्कृतसाहित्यस्य कृते प्रधानं स्थानं सुरक्षितम्। ततः कालादेव गुरुकुलं वेदादिशास्त्राणां लौकिक-संस्कृतसाहित्यस्य चापि प्रसारे कृतयत्नं लक्ष्यते। प्रथमकक्षातः एम० ए० कक्षापर्यन्तम् अत्र संस्कृताध्यापनस्य सुप्रबन्धो वर्त्तते।

शब्दकोश :

तत्त्वावधाने =वास्तविक ध्यान पूर्वक संरक्षण में
खिष्टाब्दे =ईस्वी सन्
कृते =के लिए।
सर्वकारः =सरकार
साग्रहम् =आग्रह पूर्वक
अन्वितम्=युक्त

अभ्यास :

१ अपने विद्यालय में आने वाली किसी संस्कृत-पत्रिका से ऐसी ही कोई विज्ञप्ति उतार कर उसका हिन्दी अनुवाद करो। संस्कृत-पत्रिका न मिले तो हिन्दी-पत्रिका लेकर उस में से किसी विज्ञप्ति का संस्कृत में अनुवाद करो।

२ विज्ञप्ति में कोई सूचना, समाचार, घोषणा आदि दी जाती है। बताओ इन विज्ञप्तियों में क्रमशः क्या - क्या सूचना, समाचार या घोषणा विद्यमान हैं।

३ इन विज्ञप्तियों के आधार पर निम्न प्रश्नों के उत्तर संस्कृत में दो—

(क) वियतनामे किं भवति किं च भवतु ?

(ख) युद्धावरोधाय किं करणीयम् ?

(ग) राजस्थाने किम् अभूत् ?

(घ) संस्कृत-विषये शिक्षामन्त्रिणा किं कथितम् ?

(ङ) गुरुकुल-कांगड़ी - विश्वविद्यालयः केन, कदा, कुत्र च स्थापितः आसीत् ?

(च) अस्य विश्वविद्यालयस्य का विशेषता ?

एकोनत्रिंशः पाठः

शूद्रक वीरवरयोर् औदार्यम्

अस्ति शोभावती नाम नगरी। तस्यां शूद्रकाख्यो नृपतिरभूत्। तेन रक्षितेन धर्माचरणेन वसुन्धरा रामादीनपि भूपतीन् विसस्मार। तं प्रियशूरम् एकदा कश्चन वीरवरो नाम द्विजः सेवार्थम् उपाययौ। तस्य धर्मवती नाम भार्यायाः एकः सुतः एका च कन्या बभूव। सः स्ववृत्तये प्रतिदिनं दीनार-शतपञ्चकं राजानम् अयाचत। गुण-ग्राही स राजा तस्मै यथेप्सितां वृत्तिं ददौ। सोऽपि दिवानिशं सिंहद्वारम् अधितिष्ठति।

स्ववृत्तिलब्धानां दीनाराणां शतं स भोजनार्थं स्वभार्यायै प्रादात्। परेण च शतेन वस्त्राणि, अङ्गरागं, ताम्बूलं च क्रीणाति। स्नात्वा च अपरं शतं देवताराधने उपायुङ्क्त। शतद्वयं च दानं ददौ। एतादृशीं तस्य दैनन्दिनीं चर्यां दृष्ट्वा राजा हृदये महान्तं सन्तोषम् अवाप।

घोर-मेघौघे दिवानिशं वर्षत्यपि वीरवरो यथापूर्वमचलः स्वकर्मणि स्थितोऽभूत्। समये असमये वा परिक्षितोऽयं तथैव सेवमानस् तिष्ठति।

'अहो ! सुदृढ-सत्वोऽयं वीरवरो मे भवतः, अवश्यं मया महत्पदं प्रापणीयः इति निश्चिक्ये राजा ।

एकदा राजा विदूरे रुदतीं विषादविकलां काञ्चन ललनां शुश्राव । जातविस्मयो राजा आदिदेश, "भो वीरवर ! शृणु ! दूरे एषा कापि ललना आक्रोशति । काऽसौ ? किञ्च रोदिति ? इति गत्वा निरूपय' इति ।

आदिष्टो वीरवरो निबद्धासिः प्रस्थितः । करुणा-कौतुकाक्रान्तः राजापि प्रासादादवतीर्य अलक्षितस्तम् अनुजगाम ।

· स्वम् अनुसरन् नगर्याः बहिर् एकं सरः प्राप । रुदतीं ललनां पप्रच्छ,

वीरवरः — का त्वम् ? रोदिषि किञ्चैवम् ?'

ललना उवाच—'भो वीरवर ! माम् महीम् अवबुधस्व । राजा शूद्रकः धार्मिको मम पतिः । तृतीये अहनि राज्ञो मरणं ध्रुवम् । इति सञ्चिन्त्य खेदादनुशोचामि । तादृशं पतिं न लप्स्ये । "इति ।

वीरवरोऽवदत्—''देवि ! वेत्सि कञ्चन उपायम् ?"

वसुन्धरा—"तदर्थम् एकं साधनम् अस्ति ।"

वीरवरः —"किन्त्र तत् ?"

वसुन्धरा—"या एषा राजकुलान्तिके चण्डिका देवी विद्यते तस्यै यदि त्वं स्वपुत्रम् उपहारीकरोषि तन्नैष राजा म्रियते । शतं च समा अन्यत् जीवति ।"

वीरवरः—'यामि देवि ! कुर्वे एतदधुनैव ।"

वसुन्धरा—"भद्रं तेऽस्तु ।' इत्युक्त्वा तिरोदधे ।

सर्वममुं वृत्तान्तं निलीनो नृपः अपि शुश्राव । वीरवरोऽपि स्वगेहं प्रविश्य सकलां कथां परिवारं विबोध्य श्रावयामास । बालोऽपि प्रौढमतिः

सुतः सत्त्ववरः पितरमब्रवीत्—

"कृतार्थोऽहं, मम प्राणैः राजा चेत् तात ! जीवति ।
भुक्तस्य हि तदन्नस्य दत्ता स्यान् निष्कृतिर् मया ॥"

अथ सुतं स्कन्धे समारोप्य सः कन्यया भार्यया, प्रछन्नेन च राज्ञा अनुगम्यमानः मन्दिरम् आजगाम । सुतश्च—"मम मूर्धोपहारेण राजा चिरं जीवतु शूद्रकः वत्सरशतं च राज्यं कुर्याद्" इति वाक्यैः देवीम् उपासत । पिता सुतस्य शिरश्छित्त्वा देव्यै तद् अर्पयाञ्चक्रे । "साधु ! वीरवर ! स्वामिभक्त साधु ! इति अशरीरणी वाक् अन्तरिक्षादन श्रूयत ।

भ्रातुः दुःखम् असहमाना कन्या वीरवती आत्मानं व्यापादयामास । शोकाद् विलपन्तीं दयितां, 'प्रविशामि अनलम्' इति वदन्तीं दृष्ट्वा दुःखम् असहमानो वीरवरः तत्कृते चितामकरोत् । साऽपि 'जन्मान्तरे अयं भूयादार्यपुत्रः पतिर्मम' इति वदन्ती चितानले निपपात । वीरवरोऽपि भुक्तस्यान्नपिण्डस्य आनृण्यं मन्वानः—'शिवे ! ते नमोऽस्तु । अधुना प्रसीद मन्मस्तकोपहारेण' एवं स्तुत्य स्वम् उत्तमाङ्गं चिच्छेद ।

शूद्रको विस्मयेन व्याकुलो व्यचिन्तयत्—'अहो किमनेन दुष्करं कर्म कृतम् । चित्रमिदम् ! संसारे एतादृशो धीरो भवेद्यः प्रभोरर्थे परोक्षम् असून् दद्यात् ? यदि अहमस्य उपकारस्य न प्रतिकुर्यां तदा का ताम मे प्रभुता ।' इति सञ्चिन्त्य भूपालः कोषतः खड्गम् आकृष्य देवीं न्यवेदयत्—'देवि ! मम शीर्षोपहारेण सुप्रीता भव । मयि अनुग्रहं कुरु । मदर्थं त्यक्तजीवितः वीरवरः सकुटुम्बो जीवतु ।" "एवमुदीर्य यावद् शिरश्छेत्तुं प्रवर्तते तावदेव दिवो भव्या भारती समुदभूत्-न्राजन् । मा साहसं कृथाः । ते सत्त्वेनाहं प्रीताऽस्मि । अयं वीरवरः सपरिवारः जीवतु नाम ।'

तस्मिन्नेव क्षणे सर्वे निद्रायाः इव उत्थिताः । देव्यनुग्रहोऽयम् इति निश्चित्य च देवीं पणम्य प्रतिनिवृत्ताः । राजापि सर्वं समीक्ष्य न्यवर्तत । प्रासादम् आरुह्य, व्याजहार—"कः कोऽत्र भोः?" उत्तरे च, "सोहम्

वीरवरः। देवादेशात् स्त्रियमन्वेष्टुमं जगाम। सा च दृष्टनष्टैवाभूत्।" इति एतादृशं निरभिमानं तस्य वचः श्रुत्वा राजा विस्मितो बभूव। वीरवरे भृशं प्रीतः महाराजः कृत्स्नं रात्रिवृत्तान्तं मन्त्रिभ्योऽवर्णयत्। सर्वे च ते आश्चर्यचकिताः समभवन्।

सुप्रसन्नः पृथिवीपतिः सपुत्राय वीरवराय समं राज्यं ददौ। उभौ च तौ वीरवरशूद्रक-भूपौ सुखमासाताम्।

शब्दकोशः

आख्यः	=नामक	विसस्मार	=भूल गई (वि+स्मृ+लिट्)
स्ववृत्तये	=गुजारे के लिये		
सिंहद्वारम्	=ड्योढी, फाटक,	दैनंदिनीम्	=दिन दिनकी
सुदृढ़-सत्वो	=बड़े हौसले वाला	निश्चिक्ये	=निश्चय किया (निः+चि+लिट्)
समाः	=वर्ष	आनृण्यम्	=उऋण होना।

अभ्यास :

१ समासों के विग्रह लिखो, तथा उनका नाम-निर्देश करोः—
यथेप्सितम्। सुदृढ़-सत्वः। निबद्धासिः। तदन्नस्य। शीर्षोपहारेण दृष्टनष्टा। आश्चर्य-चकिताः। सपुत्राय। मूर्धोपहारेण। कृतार्थः।

२ 'कृतार्थोहं इत्यादि किसने कहा? उस ने अपने को कृतार्थ क्यों माना। इस श्लोक का अर्थ लिखो।

३ पुत्र, कन्या, माता, वीरवर और राजा सब ने ही आत्म बलिदान किया, इन में कौन प्रशस्ततर है, और क्यों?

४ नीचे लिखे प्रश्नों के संस्कृत में उत्तर दो :—
(क) वीरवरः स्ववृत्तये कस्य पार्श्वे उपाययौ किं च अयाचत?
(ख) राजा वीरवरस्य सेवां दृष्ट्वा किमचिन्तयत्?
(ग) सा रुदती ललना का आसीत्, किमर्थं च रोदिति स्म?
(घ) मन्दिरं के अगच्छन्? राजा च कथं गतः?
(ङ) वीरवरस्य उपकारं विलोक्य राज्ञा किं कृतम्?

त्रिशः पाठः

योग्यता-परीक्षणम्

१ नीचे लिखे वाक्यों में समस्त पद काले अक्षरों में मुद्रित हैं। उनका विग्रह करते हुए और कोष्ठक में समास का नाम लिखते हुए इनका पुनर्लेखन करो :—

काचन **कर्षककन्या** गोशालातः **पयः-पूर्ण-कलशं** गृहीत्वा प्रत्यावर्त्तत। द्वादश **कुक्कुटाण्डानि** क्रेष्यामि। **यथासमयम्** आपणं गमिष्यामि। सा **उपगोशालं** शिरः समचालयत्। **आङ्ग्ल-भाषायाम्** अपि सूक्तयः सन्ति।

कस्मिंश्चिद् **वनोद्देशे प्रसाधितकार्यो** महाचतुरको नाम शृगालः आसीत्। सिंहमवलोक्य **भूतलन्यस्तमस्तकः** सविनयम् अवदत्। व्याघ्रं दृष्ट्वा गर्वाद् **उन्नतकन्धरः** अवदत्। इदानीमेव **दुष्ट-स्वभावो मृगेन्द्रो** गजमेनम् व्यापादयत्।

देवरक्षितं तिष्ठति। पर्वतीयाः **सरल-हृदयाः**।

२ नीचे लिखे गद्यांश को जहाँ हो सके वहाँ सन्धि कर के पुनः लिखो :—

एवम् निश्चित्य वृकम् अपि अवदत्, 'अये भागिनेय! चिरात् दृष्टः असि। बुभुक्षितः असि? सत्यं चेत् अतिथिः असि मे भवान्। अहं च अस्य गजस्य रक्षापुरुषः। गतः अस्ति सिंहः नद्यां स्नातुम्।' वृकः अवदत्, 'माम! यदि अनेन गजेन सिंहस्य सम्बन्धः तर्हि अयुक्तम् खादितुम्। यतः हि जीवन् एव अहम् भद्राणि अवलोकयितुम् पारयामि।' तत् अनन्तरम् शृगालः एकः समागतः। तम् च स भर्त्सयन् अत्यवाहयत्। स्वयम् च सुखेन गजमांसम् अभक्षयत्।

३ नीचे लिखे गद्यांश में काले अक्षरों में मुद्रित शब्दों को समस्तपद में बदल कर लिखो :—

परमो विद्वान् वेदानां वेदाङ्गानां च ज्ञाता वीरो **न्यायस्यरक्षकः च । विशालस्य देशस्य व्यवस्थायै** तिस्रः सभा बभूवुः । तेषु **चतुर्णां वेदानां ज्ञातारः षण्णाञ्च शास्त्राणां वेत्तारो** ऽपि बभूवुः । **एषां स्थानानां दर्शनाय, पर्वतानां शोभानां निभालनाय च यात्राणां व्यवस्था** क्रियते । **छात्राणां संघाः सर्वेभ्यो भारतस्य राज्येभ्यः एतेषाम् अवलोकनाय** सर्वत्र परिभ्रमन्ति । **धृताः सर्वे पदार्थाः यासु ताः बहु भारश्च यासु,** ताः मञ्जूषाः अधराम ।

४ नीचे के गद्यांश को फिर से लिखो और काले अक्षरों में मुद्रित पदों में सन्धिच्छेद करते हुए कोष्ठक में उसका नाम दोः—

—'अहो **बहुमत्स्योऽयं** ह्रदः । **कदाचिदप्यस्माभिर्नालोडितः ततस्तेषान्तद्वज्रोपमं** वचस्सम **माकर्ण्यानागतविधाता सर्वमत्स्याना-हूयोचे । श्रुतं भवद्भिर्यन्मत्स्यजीविभिरभिहितम् । तद्रात्रावेवा-गम्यतां किञ्चिन्निकटतरं** सरः । **तन्न युक्तं क्षणमप्यत्राव-स्थातुम् । कुतश्चिद्वणिजस्सुतोऽभवत् । अथैकदा** कश्चित् कृपीवलस्ति-**लान् भूमाववपत् । चेतस्यतीव प्रसन्नोऽभवत्** ।

५ नीचे के वाक्यों में संख्या-शब्द अंकों में लिखे हैं । इन के स्थान पर संस्कृत में संख्या लिखो, विभक्ति का ध्यान रखनाः—

(क) अस्मिन् ग्राम १६ वस्तूनां विशिष्टम् उत्पादनं जायते ।
(ख) अस्यां सभायां ५४ सभासदः सन्ति ।
(ग) अस्मिन् उद्याने १११ आम्र वृक्ष और ८१ आम्रजातियाँ हैं ।
(घ) अध्यापकः २१ छात्रान् पर्यैक्षत ।
(ङ) १०० बालकानां परीक्षापरिणामः प्रकाशितोऽभवत् ।
(च) ४५ अनाथानाम् वस्त्राणि अपेक्षन्ते ।
(छ) मुख्याध्यापकः ७५ छात्रान् उत्तीर्णान् घोषयाञ्चकार ।

६ नीचे लिखे प्रश्नों का उत्तर संस्कृत में दोः—

१ कैः कैः भग्नावशेषैः भारतस्य गौरवमद्यापि अनुभूयते ?
२ शठे शाठ्यं केन आचरितम् कश्च तस्य परिणामोऽभवत् ?
३ सर्वदमनस्य के के गुणाः प्रकाशिता लेखकेन ?
४ गणतन्त्रदिवसे किं किं प्रदर्श्यते !
५ पञ्च संस्कृत-सूक्तयः पञ्च हिन्दीसूक्तयः च समानार्थाः लेख्याः ।

७ नीचे लिखे वाक्यों का संस्कृत में अनुवाद करो :—
(क) ६२ छात्रों को प्राचार्य प्रमाणपत्र देता है ।
(ख) ९२ बालिकाओं और ७२ वालकों के साथ २२ अध्यापक इस माध्यमिक स्कूल में हैं ।
(ग) ६४ दिनों में हमारा खेत पक गया ।
(घ) १९७५ में युद्ध का भय है ।
(ङ) देखे हुए तीर्थ-स्थानों से लौटते हुए ३५ यात्रियों की मोटर-दुर्घटना में मृत्यु हो गई ।
(च) हम सब हिमशिखरों को देखते हुए मानसरोवर तक गए ।
(छ) परीक्षा में उत्तीर्ण होकर ७२ छात्रों को भोजन कराओ ।
(ज) भगवान् मुझे सामर्थ्य दें मैं संसार भर में भारतीय संस्कृति को फैला सकूं ।
(झ) सीमावर्त्ती शत्रुओं के साथ भारतीय सदा जीतेंगे ।

८ 'अजातपुत्रस्य नामकरणम्' इस शीर्षक का भावार्थ स्पष्ट करो । इस पाठ में दी दो कथाओं में क्या समानता है ?

९ शृगाल की चतुरता से क्या नीति सीखते हो, स्पष्ट करके लिखो ।

१० 'दो के झगड़े में तीसरे का लाभ' इस उक्ति को किस पाठ की कथा से सिद्ध कर सकते हो ? कैसे ? संक्षेप में वह कथा लिखो ।

११ दुष्ट के साथ कैसा व्यवहार करना चाहिए ? हिन्दी या संस्कृत में इस विषय पर कही गई उक्तियां ढूंढ कर, गुरु जी से पूछ कर लिखो ।

१२ (क) निम्न गद्यांशों का अपनी मातृभाषा में अनुवाद करो :—

१ प्रथमपाठस्य, सप्तमः सन्दर्भः ।

२ चतुर्थस्य पाठस्य-'आश्रमं चिर-संवद्धं···निगृहीतः ।' इति ।

३ सप्तम पाठस्य-'हं हो ! कपटसंन्यासिन् ! ···प्रेषितः ।' इति

४ द्वदशस्य पाठस्य-'अजातपक्षतया···उपपादयेत् ।' इति ।

५ एकविंशपाठस्य-'ततः प्रदीप्ते वैश्वानरे···इति ।' इति ।

६ एकोनत्रिंश 'पाठस्य' शूद्रको विस्मयेन···जीवतु नाम ।'

(ख) इन सन्दर्भों में आये समस्त पदों का विग्रह तथा समास नाम भी लिखो ।

(ग) इन संदर्भों का प्रसंग बताते हुए वक्ता का नाम लिखो ।

(घ) जिन पदों में सन्धि है उन का विच्छेद दर्शाओ ।

(ङ) क्रिया पदों को छांटो । उन के पुरुष, वचन, काल लिखो ।

१३ नदी, दुहितृ, विद्वस्, गतवत् के रूप सब विभक्तियों में, सब वचनों में, अर्थ-सहित लिखो ।

१४ पत्, पूज, लाभ्, नृत्, चिन्त्, धातुओं के कृदन्त रूप लिखो । उन का अर्थ-भेद भी समझाओ ।

१५ किन्हीं दो भिन्न रूप वाले सर्वनाम शब्दों के रूप अर्थसहित लिखो । जैसे-एतत् और सर्व । या 'अदस्' अस्मद् ।

१६ निम्न सूक्तियों का मातृ भाषा में विशद व्याख्यान करो :—

१ जयो रन्ध्र-प्रहारिणाम् ।

२ ननु सर्वस्याभ्यागतो गुरुः ।

३ भिन्नरुचिर्हि लोकः ।

४ विक्रीते करिणि किमङ्कुशे विवादः ।

५ स्वभावो दुरतिक्रमः ।

१७ संस्कृत में अनुवाद करो।

बालकों ने स्कूल में पुस्तकें पढ़ीं, अब भी पढ़ते हैं और आगे भी पढ़ेंगे। गौओं के दूध से आज भी मिठाई बनती है। पहले भी बनती थी, आगे भी बनेगी। गुरुओं से सदा शिष्यों को आशीर्वाद दिया जाता है, पहले भी दिया गया था, आगे भी दिया जाता रहेगा। भगवान् करे बालक पुस्तकें पढ़ें। वर्षा ऋतु में भी मल्लाह (नाविक) से नदी से बालकों का उद्धार किया गया। हम तो कुछ भी नहीं कर सकते, हम तो आलसी हैं। नगर के पास ये उद्यान शोभा देते हैं।

१८ अस्ति कस्मिंश्चित् पर्वतैकदेशे महान् वृक्षः। तत्र च सिन्धुकनामा कोऽपि पक्षी प्रतिवसति। तस्य विष्ठायाँ सुवर्णम् उत्पद्यते। कश्चिद् व्याधः तत्र समाययौ। स च पक्षी तदग्रत एव विष्ठाम् व्यसृजत्। तां दृष्ट्वा व्याधो विस्मयम् आगतः। स तत्र वृक्षे पाशम् अबध्नात्। पक्षी अपि विश्वस्तचित्तस्तत्रोपविष्टः। तत्कालमेव च पाशेन बद्धः। व्याधस्तं निजावासं नीतवान्। अथ चिन्तयामास--यदि ईदृशं पक्षिणं ज्ञात्वा कश्चित् राज्ञे निवेदयति तन्नूनं मे प्राण-संशयः।' इति विचार्य पक्षिणं राज्ञे समर्पितवान्। राजापि तस्य पक्षिणो रक्षणाय रक्षापुरुषान् नियोजितवान्। मन्त्रिणा तु कथितम्--'राजन्! किं कदाचित् पक्षिपुरीषे सुवर्णं भवति। अश्रद्धेयम् एतत्।' इति मन्त्रिवचनात् राज्ञाऽसौ पक्षी मोचितः।

पक्षी तु द्वारे समुपविश्य सुवर्णमयीं विष्ठां विधाय श्लोकमेतमपाठीत्—

पूर्वं तावदहं मूर्खो द्वितीयः पाशबन्धकः।
ततो राजा च मन्त्री च सर्वं वै मूर्खमण्डलम्॥

(क) इस अपठित संस्कृत कथा का मातृभाषा में अनुवाद करो!
निम्न प्रश्नों के उत्तर भी लिखो :—

१ व्याध ने पक्षी क्यों पकड़ा ?

२ पकड़ कर क्यों राजा को दे दिया ?

३ पक्षी राजा की पकड़ से कैसे छुटकारा पा गया ?

४ पक्षी ने चारों को मूर्ख क्यों बताया ?

(ख) इस पाठ में कौन सी लोकोक्ति है ? इस लोकोक्ति सम्बन्धी कोई वर्त्तमान कालिक घटना सुनाओ ।

(ग) इस कथा का शीर्षक बताओ ।

१९ संस्कृत में एक पत्र अपने मित्र को लिखो जिसमें उसे अपने भाई के विवाह पर ५-७ दिन पहले से आने के लिए आमन्त्रित करो ।

२० प्रधानाध्यापक को एक पत्र संस्कृत में लिखो जिस में एक दिन के अवकाश के लिए कोई कारण बताकर प्रार्थना करो ।

२१ नीचे दिये विषयों पर १०--१५ वाक्यों में अपने विचार संस्कृत में प्रकट करो ।

(क) मम प्रिय-पुस्तकम् (ख) हिमालयः ।

(ग) अस्माकं विद्यालय : ।

(घ) राजस्थानस्य दर्शनीयानि स्थानानि ।

२२ पाठ सं० २१, ३३, और ३४ में से किन्ही दो का पूर्णतः हिन्दी में अनुवाद करो ।

२३ पाठ सं० ५, १०, १५, १६, १७ व १८ में से किन्हीं तीन के लिए क्या और कोई शीर्षक सुझा सकते हो ? वर्तमान शीर्षक कहाँ तक ठीक हैं ।